चतुर्विधानभिनयान्नाट्यभेदांस्तथैव च ।
श्रुतिस्वरसमायुक्तरागात्मकसुगीतकान् ॥ ४२ ॥

चतुर्विधान्वाद्यभेदांस्ततानद्धघनादिकान् ।
सस्वरज्ञानलयकं मर्मकर्माणि सर्वतः ।
कैशिकीनाट्यसंभेदान्सम्यक्तासामुपादिशत् ॥ ४३ ॥

भरतः साप्सरःसंघैर्नृत्तगीतविशारदैः ।
इन्द्रध्वजोत्सवे प्राप्ते प्रायाद्देवसभां मुदा ॥ ४४ ॥

ब्रह्मणा समनुज्ञातो नाट्यपाटविशारदः ।
नाटकं चेन्द्रविजयं नाम्ना कृत्वा प्रयोगकम् ॥ ४५ ॥

सूत्रपात्रक्रमं सम्यङ् निर्धार्याशु सुनैपुणः ।
पाकशासनमादित्यसहस्रमकुटोज्ज्वलम् ॥ ४६ ॥

नीलाङ्गसुन्दरतरं पीताम्बरमनोहरम् ।
विद्याधरीकराधूतचामरद्वयशोभितम् ॥ ४७ ॥

मुक्तातपत्रविलसत्किरीटद्युतिराजितम् ।
महर्षिभिः प्रकृतिभिः सेव्यमानं सुरोत्तमैः ॥ ४८ ॥

आखण्डलं महाबाहुं विद्याद्यैश्च महामुनिः ।
जयशब्दाभिपूर्वं च स्तुत्वा नाट्यविधानतः ॥ ४९ ॥

महेन्द्रविजयं नाम तदारभत नाटकम् ।
तत्र दिव्यसभामध्ये प्रस्तावनपुरस्कृतम् ॥ ५० ॥

केचित्तालधराश्चैव श्रुतिकाराश्च केचन ।
तथा केचित्सूत्रधाराः केचिन्मार्दङ्गिकास्तथा ॥ ५१ ॥

नारदाद्याः सगन्धर्वा वैणिका वैणवाः परे ।
सौदामनीमञ्जुकेशीमुख्या दिव्यविभूषणाः ॥ ५२ ॥

चतुर्विधाभिनयगकैशिकीमार्गतत्पराः ।
पात्राणि भूत्वाऽनेकानि ननृतुर्नाट्यमद्भुतम् ॥ ५३ ॥

शृङ्गारादिरसैर्युक्तं पश्यन्ती साऽद्भुतं सभा ।
तस्थौ चित्रवदत्यन्तं सुकुमारं सुनाट्यकम् ॥ ५४ ॥

अत्यन्तगानमाधुर्यं श्रवणानन्दकारणम् ।
श्रुत्वा तदद्भुतं साक्षात्सहस्राक्षः प्रसन्नधीः ॥ ५५ ॥

हारकेयूरमकुटदिव्याम्बरमुखैः प्रियैः ।
दानमानादिसत्कारैः संपूज्य च महानटम् ॥ ५६ ॥

उवाचात्यन्तसंतुष्टश्चात्मनो जयमद्भुतम् ।
सभानुरञ्जनकरमिदानीं भरतर्षभ ॥ ५७ ॥

भ्राजितोऽस्मि महाप्राज्ञ मत्सभाभूषणं शुभम् ।
वरं वरय भद्रं ते त्रैलोक्ये यद्यदिच्छसि ॥ ५८ ॥

इत्युक्तो भरतो वव्रे नाट्यरङ्गस्थलं शुभम् ।
तद्रङ्गमण्डपविधिं यथाशास्त्रं स वृत्रहा ॥ ५९ ॥

निर्माय शिल्पनिपुणैर्विश्वकर्मादिभिस्तथा ।
प्रददौ भरताय द्राक्तद्विधानक्रमो यथा ॥ ६० ॥

हस्तदण्डप्रमाणलक्षणमाह—

अणवोऽष्टौ रजस्तानि फालमष्टौ तथा पुनः ।
तान्यष्टौ लिक्षमित्याहुस्तान्यष्टौ यूकमुच्यते ॥ ६१ ॥

यूकाष्टकं यवं प्राहुस्तान्यष्टावङ्गुलं तथा ।
चतुर्विंशत्याऽङ्गुलानां शिल्पिहस्तः प्रकीर्तितः ॥ ६२ ॥

अष्टोत्तरं शतं तेषां हस्तानां रङ्गमण्डपम् ।
उत्तमं तद्विदः प्राहुर्देवयोग्यं तथैव च ॥ ६३ ॥

चतुःषष्टिर्मध्यमं स्यात्कनिष्ठं तु तदर्धकम् ।
क्रमाद्देवादिकानां च योग्यं त्रिचतुरश्रकम् ॥ ६४ ॥

विकृष्टं चोन्नतकरं समं तु चतुरश्रकम् ।
त्रिकोणं मध्यमं त्र्यश्रं सर्वसाधारणं तथा ॥ ६५ ॥

शतं च मानुषं रङ्गमण्डपं योग्यमुच्यते ।
दिव्यचित्रावलीयुक्तं सर्वलक्षणसंयुतम् ॥ ६६ ॥

नानारत्नसमाकीर्णं सर्वरक्षायुतं तथा ।
सेवितं ब्रह्मरुद्राद्यैर्वसुदिक्पतिभिः सुरैः ॥ ६७ ॥

सांनिध्यकृद्भिः संयुक्तमद्भुतं रत्नजालकम् ।
ईदृश्यां नाट्यशालायां सुराचार्यपुरस्कृतः ॥ ६८ ॥

भरताचार्यमुख्यैश्च नाट्यगीतविशारदैः ।
सहितो वज्रपाणिस्तु भद्रासनमुपेयिवान् ॥ ६९ ॥

तत्र चाप्सरसां संघान्भरतोऽनर्तयत्तथा ।
तत्र विघ्नो महाञ्जातः सर्ववाग्बन्धकारकः ॥ ७० ॥

तं समीक्ष्य सहस्राक्षो महाग्रहसमन्वितः ।
निजध्वजमुपादाय विघ्नरूपांस्तु राक्षसान् ।
जघान रङ्गमध्यस्थान्पलायनपरांश्च तान् ॥ ७१ ॥

तत्प्रहारसमुद्भूतः कश्चिद्वाद्यविशेषकः ।
जर्जरी नाम सा प्रोक्ता वज्रायुधसुरक्षिता ॥ ७२ ॥

पञ्चपर्वसमायुक्ता ब्रह्मादिसुरसंनुता ।
विरूपाक्षादिरक्षांसि निघ्नती विघ्नहारिणी ॥ ७३ ॥

रङ्गाधिदेवताः सर्वा आराध्यन्त विशेषतः ।
स्वस्तिवाचनपूर्वं च ब्रह्मघोषयुतं तथा ॥ ७४ ॥

एवं नित्योत्सवयुतं रङ्गमण्डपमुत्तमम् ।
भरताचार्यवर्यस्तु स्वशिष्यैरपि संयुतः ॥ ७५ ॥

मङ्गलालम्बिनान्द्यादिदिव्यभूषणभूषितः ।
सभापतिश्च सभ्याश्चाङ्गनागणयुतास्तथा ॥ ७६ ॥

नटयो नटाश्च मोदन्ते यत्रान्योन्यानुरञ्जनात् ।
स रङ्ग इति विज्ञेयः स एवाग्रे प्रकीर्तितः ॥ ७७ ॥

यन्नाटयवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये ।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स कीर्तितः ॥ ७८ ॥

यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके ।
तेषामवश्यकर्तव्या नान्दी नन्दीश्वरप्रिया ॥ ७९ ॥

अष्टभिस्तु पदैरेषा निबद्धा स्वर्णदायिनी ।
द्वाविंशतिपदा नान्दी भुक्तिमुक्तिप्रदा भवेत् ॥ ८० ॥

तत्र सूत्रलक्षणमाह—

नानाविधाभिनयसंसूचनं सूत्रमुच्यते ।
तद्धारणात्सूत्रधार इति तज्ज्ञैरुदाहृतः ॥ ८१ ॥

तत्र रङ्गस्थले दिव्यान्देवानावाहयच्छुचिः ।
सर्वेश्वरं वासुदेवं ब्रह्माणं चन्द्रशेखरम् ॥ ८२ ॥

महेन्द्रं कार्त्तिकेयं च श्रियं वाणीं सरस्वतीम् ।
पुष्पवन्तौ सिद्धिबुद्धी स्मृतिं मेधां सशक्तिकाम् ॥ ८३ ॥

दिक्पालकान्समरुतः स्वधास्वाहायुतानलम् ।
फणिराट्चक्रगरुडसप्तोदधिमहामुनीन् ॥ ८४ ॥

यक्षराक्षसपैशाचगुह्यकादींस्ततस्ततः ।
आवाह्य विधिवत्पूजामकरोद्भरताग्रणीः ॥ ८५ ॥

तत्र निर्विघ्नकरणं गणनाथमपूजयत् ।
अष्टाङ्गपदतालाढ्यनान्दीमङ्गलपूर्वकम् ।
पुष्पाञ्जलिं पुरस्कृत्य रङ्गपीठासनस्थितः ॥ ८६ ॥

वीणावेणुमृदङ्गवादनपरा गानोन्मुखाः सूत्रका-
स्तालस्वस्तिकधारिणः कुशलिनश्चक्रुस्तथोपक्रमम् ।
देवेन्द्रैकजयप्रदं सुरुचिरं दिव्याप्सरःसंहितं
दिव्यं रूपकमद्भुतं सुविलसत्कैशिक्यमानर्तयन् ॥ ८७ ॥

नवरसभावितहावभावयुक्तं
सललितविभ्रमसद्विलासहास्यम् ।
शुभकिलिकिञ्चितदिव्यसारयुक्तं
सरससुनाट्यमतोषयत्सभां ताम् ॥ ८८ ॥

अङ्गप्रत्यङ्गसहितोपाङ्गरूपक्रियायुतम् ।
हस्तभेदांश्चतुःषष्टिं सानुभावं विशेषयत् ॥ ८९ ॥

सर्वनेत्रोत्सवकरं सभारञ्जनकारकम् ।
चेतनाचेतनकरं चेतयच्चाप्यचेतनान् ॥ ९० ॥

तौर्यत्रिकप्रपञ्चोत्थनादब्रह्ममयं शुभम् ।
ब्रह्माण्डभाण्डकुहरह्रदशङ्कारवैभवम् ॥ ९१ ॥

शृङ्गाररसकल्लोलसमाक्रान्ताः सभासदः ।
दृष्ट्वा प्रयोगचातुर्यं ब्रह्माद्याः सर्वदेवताः ।
मुदा परमया युक्ता भरतं साध्वपूजयन् ॥ ९२ ॥

कदाचिद्भरताचार्यः शिष्यबृन्दयुतो मुनिः ।
कैलासमगमत्तत्र महानटसिसेविषुः ॥ ९३ ॥

दाक्षायण्या सहासीनं महादेवं प्रणम्य च ।
चतुर्विधं नाट्यभेदं स्वशिष्यैः समनर्तयत् ॥ ९४ ॥

महेश्वरस्तु संतुष्टः स्वनाट्यं ताण्डवोद्भवम् ।
अद्भुतं षोडशविधं पार्वत्यास्तु तथैव च ।
लास्यक्रमं सप्तविधं नन्दिकेशमुखाददात् ॥ ९५ ॥

अथादिदेश भरतं सर्वलोकोपकारकम् ।
सविस्तरं नाट्यशास्त्रं धर्मकामार्थमोक्षदम् ॥ ९६ ॥

शिष्यानुशिष्यमुखतः प्रसिद्धं तत्तदा कुरु ।
त्वन्नाम्ना चैव नाट्यं तु प्रबद्धं तद्भविष्यति ॥ ९७ ॥

एवं शिवकटाक्षाप्तनाट्यसाम्राज्यधूर्वहः ।
भक्त्या स्तुत्वा महादेवं नन्दिप्रमथपूर्वकम् ॥ ९८ ॥

अनुज्ञात उपागत्य मरीचेराश्रमं ततः ।
न्यवेदयत तत्सारमीश्वरस्य प्रसादजम् ॥ ९९ ॥

मरीचिश्च स्वपुत्राय कश्यपाय न्यवेदयत् ।
स याज्ञवल्क्यमुनय आञ्जनेयाय सोऽपि च ॥ १०० ॥

हनूमाञ्शिष्यसहितः संगायन्विचचार ह ।
तत्र तत्र वनोद्देशे गायनास्तमनूजगुः ॥ १०१ ॥

नारदस्तुम्बुरुश्चैव द्वावागत्य मरुत्सुतम् ।
श्रद्धया द्वौ मुनी ह्येतौ गुण्डक्रियमगायताम् ॥ १०२ ॥

तद्गीतश्रवणात्सद्यो गीतायन्ते शिलास्तदा ।
ततो भरतशिष्याणामुच्यते दैवतं परम् ॥ १०३ ॥

मरीच्यत्रिमुखाश्चैव मतङ्गो याष्टिकस्तथा ।
दुर्गा शक्तिश्च शार्दूलो रम्भा चार्जुन एव च ॥ १०४ ॥

आञ्जनेयो नारदश्च नन्दिकेशः षडाननः ।
अगस्त्यश्च्यवनश्चैव भरतागमकारकाः ॥ १०५ ॥

॥ इति स्कान्दपुराणे संग्रहचूडामणौ
प्रथमोऽध्यायः ॥

॥ द्वितीयोऽध्यायः ॥

नृत्यं गीतं च वाद्यं च दृश्यं श्राव्यं मनोहरम् ।
संगीतं प्रोच्यते तज्ज्ञैः संगीतं सामवेदजम् ॥ १ ॥

गान्धर्वजनकं चैव सामगानं शिवप्रियम् ।
वेदानां सामवेदोऽस्मीत्याह श्रीभगवान्हरिः ॥ २ ॥

तत्र साममहावेदे गान्धर्वमुपवेदकम् ।
ब्रह्माऽसृजत्सृष्टिकाले देवांश्चादावगापयत् ॥ ३ ॥

भगवानथ गोविन्दो गोपिकावृन्दवन्दितः ।
वेणुगानरतो नित्यं नृत्यवाद्यविशारदः ॥ ४ ॥

गोपिकामण्डले कृष्णो रासक्रीडाविलासकृत् ।
गोपीगोपालगोप्रीत्यै वेणुवादनमातनोत् ॥ ५ ॥

शिशुपशुफणिनामतीव हृद्यं
सुचिरविलासमनोहरं प्रकामम् ।
श्रुतिविषयमहासुखं त्रिलोकी-
प्रथमरसं प्रवदन्ति गीतमार्याः ॥ ६ ॥

संगीतमपि साहित्यं सरस्वत्याः स्तनद्वयम् ।
आद्यमापातमधुरमन्यदालोचनामृतम् ॥ ७ ॥

सदाऽऽनन्दैकनिलयं सर्वेषां प्राणिनामपि ।
स्थाणूनां पल्लवकरं द्रावयच्च शिलामपि ॥ ८ ॥

चित्तवैक्लब्यहरणं चित्ररूपकरं नृणाम् ।
क्षुत्पिपासाश्रमहरं यतीनां चित्तमोहनम् ॥ ९ ॥

संगीतं तत्सरिगमपधनीति च सप्तभिः ।
स्वराक्षरैर्युतं चित्रं मतिविस्तारकारकम् ॥ १० ॥

संगीतं द्विविधं प्रोक्तं गान्धर्वं गानमेव च ।
देवगन्धर्वलोकेषु प्रसिद्धं संप्रदायतः ॥ ११ ॥

गान्धर्वं सकलाभीष्टदायकं देवपूजितम् ।
गान्धर्वं लक्षणैर्युक्तं प्रीतिदं शुभदायकम् ॥ १२ ॥

गानं तु भरताचार्यशार्ङ्गदेवादिलक्षितम् ।
मनुष्याणां श्रुतिमनोरञ्जनं चेष्टसिद्धिदम् ॥ १३ ॥

लक्ष्यलक्षणसंयुक्तं नित्यं श्राव्यं मनीषिभिः ।
अलक्ष्यलक्षणयुतं त्याज्यमाहुर्विपश्चितः ॥ १४ ॥

सलक्ष्यलक्षणयुतं जनरञ्जनकारणम् ।
लक्ष्यास्पदं लक्षणं तु लक्ष्यं लक्षणकारकम् ॥ १५ ॥

न्यासग्रहांशनियमावेदकं शास्त्रमुच्यते ।
तथा हि भैरवीरागं सन्यासांशग्रहं विदुः ॥ १६ ॥

लक्ष्यं तु धग्रहन्यासांशयुतं प्रसमीक्ष्यते ।
धांशन्यासग्रहस्त्वस्य गाने सर्वरसास्पदम् ॥ १७ ॥

लक्ष्यं तु सन्यासयुतं सांशं संपूर्णमुच्मताम् ।
सुसंप्रदायसंभूतं गान्धर्वं गानमेव च ॥ १८ ॥

लक्ष्यलक्षणयोश्चैव ह्यसंगत्याऽपि चेत्कृतम् ।
तच्छास्त्रासंमतं गानमार्या अश्राव्यमूचिरे ॥ १९ ॥

तस्मात्सलक्षणं लक्ष्यसंयुक्तं सुलभं नृणाम् ।
दिव्यशारीरसंपत्त्या तन्त्रीकण्ठसमत्वतः ॥ २० ॥

सरसं दिवि गान्धर्वं देवा गायन्ति सर्वशः ।
इहापि वायुपुत्राद्याः शास्त्रसंमतमाचरन् ॥ २१ ॥

चिराद्विरलभावं तत्प्राप्तं तद्विद्भावतः ।
कालात्केचित्तु तद्गानं तत्तद्देशानुरञ्जनम् ॥ २२ ॥

देशभेदाद्रागभेदाद्यथाचित्तानुरञ्जनम् ।
गायन्ति शास्त्रमुत्सृज्य मनःकल्पितमार्गतः ॥ २३ ॥

शार्ङ्गदेवादयस्तत्र विशन्तः शास्त्रमार्गतः ।
नानादेशविभागादिरागरञ्जनसंयुतम् ॥ २४ ॥

गानं लक्ष्यानुरूपेण लक्षणेन विवृण्वते ।
नानादेशादिरागाणां गानमेवं प्रचक्षते ॥ २५ ॥

गानं तु स्वरमूलं स्यात्स्वराश्च श्रुतिसंभवाः ।
श्रुतिस्वरस्वरूपं च तथा त्रिस्थानलक्षणम् ॥ २६ ॥

वादिसंवाद्यनूवादिविवादिकथनं ततः ।
जातिभेदैश्च शुद्धानां विकृतानां च लक्षणम् ॥ २७ ॥

ततः स्वरादिभेदेन ग्राममूर्च्छनयोर्गतिः ।
अनन्तरं शुद्धतानकूटतानकमीरितम् ।
प्रस्तारश्च ततो रागमेललक्षणमुच्यते ॥ २८ ॥

नृत्यवाद्यादिभेदानां लक्षणं तालवर्णनम् ।
तत्प्राणदशकं चैव प्रोच्यते क्रमशो मुने ॥ २९ ॥

पुरुषस्य विवक्षायां मानसे बोधमागते ।
गात्राग्निना गन्धवहश्चोर्ध्वमागत्य देहिनाम् ॥ ३० ॥

नाभिहृत्कण्ठमूर्धास्यसंभवो नाद ईरितः ।
पञ्चस्थानभवश्चैव पञ्चाख्या लभते तु सः ॥ ३१ ॥

अतिसूक्ष्मश्च सूक्ष्मश्च पुष्टोऽपुष्टस्ततः परम् ।
तथैव कृत्रिमश्चेति क्रमान्नादा हि जज्ञिरे ॥ ३२ ॥

हृत्कण्ठमूर्धविश्रामान्मन्द्रमध्यमतारकान् ।
उत्तरोत्तरमुद्दामद्विगुणीकृतनादतः ।
स्थानत्रयविभागेन गीततन्त्रे प्रचक्षते ॥ ३३ ॥

मन्द्रमध्यमताराश्च किंचिन्न्यूनातिनादतः ।
अनुमन्द्रातितारारव्यामवापुर्द्विविधां गतिम् ॥ ३४ ॥

श्रुतिलक्षणम्—

नादा द्वाविंशतिर्ये च श्रुतिभेदादुदाहृताः ।
आद्या साव्यक्तजननी स्वराङ्गा ह्रस्वमात्रका ॥ ३५ ॥

बिन्दुनादकलां प्राह यामाधारां परा श्रुतिः ।
सा मात्रा हृत्पुटीमध्यनाडिकात्रिकगामिनी ॥ ३६ ॥

द्वाविंशत्या तु नाडीभिस्तिर्यग्गतिभिरीरिता ।
नाडीनां पद्धतिश्चैव भाति सोपानमार्गवत् ॥ ३७ ॥

तत्रारोहणवेलायामनिलस्य तदात्मना ।
द्वाविंशतिविधा भान्ति श्रुतयश्चोत्तरोत्तराः ॥ ३८ ॥

कण्ठमूर्धान्तरालस्थमध्यमारुतसंयुताः ।
मन्द्रोच्चतारविलसत्त्रिस्थानरमणीयकाः ॥ ३९ ॥

अथ श्रुतिजन्यसप्तस्वरलक्षणम्—

नादब्रह्मणि संभूताः साक्षराः स्वरसंज्ञकाः ।
सप्त स्वराः स्युर्विस्तारं गताश्चित्रपटी यथा ॥ ४० ॥

षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा ।
धैवतश्च निषादश्च स्वराः सप्त समीरिताः ॥ ४१ ॥

एवं त्रयोविंशतिस्तु ये स्वरा विकृता मताः ।
तथा सप्त प्रकृतयः सर्वे त्रिंशदुदाहृताः ॥ ४२ ॥

तत्सप्तप्रकृतिस्वरेषु विकृतश्रेष्ठास्तु संमेलना-
न्मेलानन्तरजातभेदजनकाः सर्वेऽपि रागास्तथा ।
भूत्वा सर्वजगत्त्रयीसुजनतानन्दाब्धिकल्लोलसं-
मोदाखेलनमाचरन्ति विविधं तौर्यत्रिकस्रोतसि ॥

॥ इति स्कान्दपुराणे संग्रहचूडामणौ
द्वितीयोऽध्यायः ॥

॥ तृतीयोऽध्यायः ॥

गौर्युवाच—

भगवन्देवदेश दयां कुरु कृपानिधे ।
लक्षणं वै श्रुतीनां च तत्सप्तस्वरलक्षणम् ॥ १ ॥

तथा विकृतिभेदांश्च लक्षणं चोभयोरपि ।
उभयात्मकमेलांश्च तद्भवान्रागसंचयान् ।
विस्तरेण महादेव मम ब्रूहि विशेषतः ॥ २ ॥

शिवः—द्वाविंशतौ हि नाडीषु परानादेऽनिलागमात् ।
क्रमादारोहणं प्राप्ते तादृश्यः श्रुतयोऽभवन् ॥ ३ ॥

द्वाविंशतिश्रुतीनां च नामानि शृणु पार्वति ।
प्रथमा च द्वितीयाऽथ तृतीया च चतुर्थ्यपि ॥ ४ ॥

पञ्चमी षष्ठिका सप्तम्यष्टमी नवमी तथा ।
दशम्येकादशी चैव द्वादशी च त्रयोदशी ॥ ५ ॥

चतुर्दशी पञ्चदशी षोडशी सप्तदश्यपि ।
अष्टादशी तथैवोनविंशी विंशी तथा श्रुतिः ॥ ६ ॥

एकविंशी श्रुतिश्चैव द्वाविंशीतीरितं क्रमात् ।
पुनरन्यानि शृणु मे प्रतिनामानि तत्क्रमात् ॥ ७ ॥

तीव्रा कुमुद्वती मन्दा च्छन्दोवती दयावती ।
रञ्जनी रतिका रौद्री क्रोधा वज्री प्रसारिणी ॥ ८ ॥

प्रीतिश्च मार्जनी चैव क्षिती रक्ता तथैव च ।
संदीपन्यालापिनी च मदन्ती रोहिणी तथा ।
रम्योग्रा क्षोभिणीति द्वाविंशतिः श्रुतयो मताः ॥ ९ ॥

नादस्तीव्रामुपागम्य रिषभं समजीजनत् ।
मन्दकां स समागम्य गान्धारजनकोऽभवत् ॥ १० ॥

स नादः क्रोधया युक्तोऽजनयन्मध्यमं तथा ।
स मार्जनीं समागम्याजनयत्पञ्चमं स्वरम् ॥ ११ ॥

स नादः क्षितिसंप्राप्तो धैवतं समजीजनत् ।
सोऽथ संदीपनीं प्राप्य निषादजनकोऽभवत् ॥ १२ ॥

तस्मिंश्च क्षोभिणीं प्राप्ते षड्जः समभवत्स्वरः ।
द्वाविंशतौ श्रुतिष्वेवमभवन्रिषभादयः ।
षड्जान्ताः प्रतिशुद्धाख्याः स्वराः सप्त क्रमाच्छुभे ॥ १३ ॥

'रि ग म प ध नि स' इति ।

तेषु पञ्चमषड्जौ च निश्चलौ भेदवर्जितौ ।
मध्यमस्तु चतुर्भेदः षड्भेदा इतरे मताः ॥ १४ ॥

तथा च १. प्रतिशुद्धरिषभः, २. शुद्धरिषभः, ३. प्रतिचतुः—श्रुतिरिषभः, ४. चतुःश्रुतिरिषभः, ५. प्रतिषट्श्रुतिरिषभः, ६. षट्-श्रुतिरिषभः ; एवं रिषभः षड्विधः । १. प्रतिशुद्धगान्धारः, २. शुद्धगान्धारः, ३. प्रतिसाधारणगान्धारः, ४. साधारणगान्धारः, ५. प्रत्यन्तरगान्धारः, ६. अन्तरगान्धारः ; एवं गान्धारः षड्विधः । १. प्रतिशुद्धमध्यमः, २. शुद्धमध्यमः, ३. प्रत्यन्तरमध्यमः, ४. प्रति-मध्यमः ; एवं मध्यमश्चतुर्विधः । १. प्रतिशुद्धधैवतः, २. शुद्धध-वतः, ३. प्रतिचतुःश्रुतिधैवतः, ४. चतुःश्रुतिधैवतः, ५. प्रतिषट्-श्रुतिधैवतः, ६. षट्श्रुतिधैवतः; एवं धैवतः षड्विधः । १. प्रतिशुद्ध-निषादः, २. शुद्धनिषादः, ३. प्रतिकैशिकनिषादः, ४. कैशिकनि-षादः, ५. प्रतिकाकलिनिषादः, ६. काकलिनिषादः ; एवं निषादः षड्विधः ।

त्रयोविंशद्विकृतयः सप्त प्रकृतयस्तथा ।
स्वरास्त्रिंशत्समुद्भूता द्वाविंशतिगतास्तदा ।
श्रुतिष्वष्टैव मिश्राख्याः स्वरा द्वाविंशतौ स्मृताः ॥ १५ ॥

तत्तद्गतश्रुतीनां च मिश्राणां च यथाक्रमम् ।
लक्षणं प्रोच्यते देवि सावधानमनाः शृणु ॥ १६ ॥

आद्यादारभ्य षष्ठपदपर्यन्तं षड् रिषभा जाताः। तृतीयादारभ्याष्टमपदपर्यन्तं षड् गान्धारा जाताः। नवमादारभ्य द्वादशपदपर्यन्तं चत्वारो मध्यमा जाताः। त्रयोदशपदे पञ्चमः स्वरो जातः। चतुर्दशादारभ्यैकोनविंशपदपर्यन्तं षड् धैवता जाताः। षोडशादारभ्यैकविंशपदपर्यन्तं षण्णिषादा जाताः। द्वाविंशपदे षड्जस्वरो जातः। एवं द्वाविंशतौ पदेषु त्रिंशत्स्वरा जाताः॥

अतः परं तत्तत्पदस्वरतत्तन्मिश्राणां संज्ञा उच्यन्ते। तीव्राख्ये प्रथमपदे यो रिषभोऽजनि स एव प्रतिशुद्धरिषभ इत्युच्यते। कुमुद्वत्याख्ये द्वितीयपदे शुद्धरिषभो जातः। मन्दाख्ये तृतीयपदे प्रतिचतुःश्रुतिरिषभः प्रतिशुद्धगान्धारश्चेत्युभौ जातौ। छन्दोवत्याख्ये चतुर्थपदे चतुःश्रुतिरिषभः शुद्धगान्धारश्चेति द्वौ जातौ। दयावत्याख्ये पञ्चमपदे प्रतिषट्श्रुतिरिषभः प्रतिसाधारणगान्धारश्चेत्युभौ जातौ। रञ्जन्याख्ये षष्ठपदे षट्श्रुतिरिषभः साधारणगान्धारश्चेत्युभौ जातौ। रत्तिकाख्ये सप्तमपदे प्रत्यन्तरगान्धारो जातः। रौद्र्याख्येऽष्टमपदेऽन्तरगान्धारोऽजनि। क्रोधाख्ये नवमपदे प्रतिशुद्धमध्यमो जातः। वज्रिकाख्ये दशमपदे शुद्धमध्यमो जातः। प्रसारिण्याख्य एकादशपदे प्रत्यन्तरमध्यमो जातः। प्रीत्याख्ये द्वादशपदे प्रतिमध्यमो जातः। मार्जन्याख्ये त्रयोदशपदे पञ्चमो जातः। क्षित्याख्ये चतुर्दशपदे प्रतिशुद्धधैवतो जातः। रक्ताख्ये पञ्चदशपदे शुद्धधैवतो जातः। संदीपन्याख्ये षोडशपदे प्रतिचतुःश्रुतिधैवतः प्रतिशुद्धनिषादश्चेत्युभौ जातौ। आलापिन्याख्ये सप्तदशपदे चतुःश्रुतिधैवतः

शुद्धनिषादश्चेत्युभौ जातौ । मदन्त्याख्येऽष्टादशपदे प्रतिषट्श्रुति-धैवतः प्रतिकैशिकनिषादश्चेत्युभौ जातौ । रोहिण्याख्य ऊनविंशपदे षट्श्रुतिधैवतः कैशिकनिषादश्चेत्युभौ जातौ । रम्याख्ये विंशपदे प्रतिकाकलिनिषादो जातः । उग्राख्य एकविंशपदे काकलिनिषादो जातः । क्षोभिण्याख्ये द्वाविंशपदे षड्जो जातः । इति श्रुतिजन्यस्व-रलक्षणम् ।

अथ मेलप्रस्तारलक्षणम् ।

प्रतिशुद्धषभाज्जाता रिषभाः पञ्च कीर्तिताः ।
प्रतिशुद्धर्षभस्याधः शुद्धर्षभ उदाहृतः ॥ १७ ॥

तदधस्तु प्रतिचतुःश्रुती रिषभ एव च ।
अधश्चतुःश्रुत्यृषभस्तदधः प्रतिषट्श्रुतिः ॥ १८ ॥

अधः षट्श्रुतियुक्तश्च रिषभो लिख्यते क्रमात् ।
एवं षड्रिषभीजातः प्रस्तारक्रम ईरितः ॥ १९ ॥

गान्धारधैवतनिषादमथर्षभाध-
स्तस्याधराधरमथापि यथाक्रमं स्यात् ।
गान्धारधैवतनिषादमुखस्वाराणा-
मेवं क्रमादधरतां जनयन्ति सर्वे ॥ २० ॥

मध्यमस्य चतुर्भेदास्तदधस्तदसंभवः ।
प्रतिशुद्धाख्यरिषभात्षड्जान्तान्पङ्क्तितो लिखेत् ॥ २१ ॥

प्रतिशुद्धनिषादाधो जातः शुद्धनिषादकः ।
वामपार्श्वे लेखनीयाः स्वराः पूर्वे यथाक्रमम् ॥ २२ ॥

तदधः प्रतिकैशिक्याख्यनिषादः स जायते ।
पूर्वस्वरा लेखनीया वामपार्श्वे यथाक्रमम् ॥ २३ ॥

प्रतिकैशिकनैषादादधः कैशिकिसंभवः ।
समालिखेत्स्वरान्पूर्वान्वामपार्श्वे यथाक्रमम् ॥ २४ ॥

तत्कैशिकिनिषादाधः प्रतिकाकलिसंभवः ।
स्वरांस्तथैव विलिखेद्वामपार्श्वे यथाक्रमम् ॥ २५ ॥

प्रतिकाकलितोऽधस्तु काकलिस्वरसंभवः ।
समालिखेत्स्वरान्पूर्वं वामपार्श्वे यथाक्रमम् ।
तत्काकलिनिषादाधस्त्वभावात्तदसंभवः ॥ २६ ॥

अथ धैवतप्रस्तारः—

प्रस्तारः प्रतिशुद्धस्य धैवतस्याथ जायते ।
शुद्धधैवत एवादौ वामपार्श्वे यथाक्रमम् ॥ २७ ॥

दक्षिणे प्रतिशुद्धाख्यनिषाद उपजायते ।
तदधो जायते शुद्धनिषादो वामतः क्रमात् ॥ २८ ॥

दक्षिणे शुद्धनैषादादधस्तात्प्रतिकैशिकः ।
वामपार्श्वे लेखनीया यथाक्रममथ स्वराः ॥ २९ ॥

दक्षिणे प्रतिकैशिक्यनिषादादथ कैशिकः ।
स्वरांस्तानेव विलिखेद्वामपार्श्वे यथाक्रमम् ॥ ३० ॥

प्रतिकाकलिनैषादादधः काकलिसंभवः ।
यथाक्रमं वामपार्श्वे तदधस्तान्न जायते ॥ ३१ ॥

शुद्धस्याधो धैवतस्य लेख्यः प्रतिचतुःश्रुतिः ।
वामे स्वरा यथापूर्वं सव्ये शुद्धनिषादकः ॥ ३२ ॥

तदधः प्रतिकैशिक्यनिषादः संभवेत्किल ।
ततः स्वराँल्लिखेदेव वामपार्श्वे यथाक्रमम् ॥ ३३ ॥

तदधः कैशिको जातो वामपार्श्वे यथोपार ।
तत्कैशिकनिषादाधः संभवेत्प्रतिकाकलिः ॥ ३४ ॥

तद्वामे विलिखेत्प्राज्ञः स्वरान्पूर्वान्यथाक्रमम् ।
प्रतिकाकलिनैषादादधः काकलिसंभवः ॥ ३५ ॥

यथाक्रमं वामपार्श्वे तदधस्तान्न संभवः ।
चतुःश्रुतिर्धैवतः स्यादधः प्रतिचतुःश्रुतेः ॥ ३६ ॥

यथाक्रमं वामपार्श्वे दक्षिणे प्रतिकैशिकः ।
तदधः कैशिको जातो वामपार्श्वे यथोपरि ॥ ३७ ॥

सव्ये कैशिकनैषादादधः स्यात्प्रतिकाकलिः ।
यथाक्रमं वामपार्श्वे स्वरा लेख्या विचक्षणैः ॥ ३८ ॥

निषादः काकलिरधः सव्यस्थप्रतिकाकलेः ।
वामपार्श्वे लेखनीयं यथास्वरमुदीरितः ।
ततः प्रस्तारविरहाद्भेद एव न जायते ॥ ३९ ॥

चतुःश्रुतिधैवताधः प्रतिषट्श्रुतिधैवतः ।
यथास्वरं वामपार्श्वे दक्षिणे कैशिकं लिखेत् ॥ ४० ॥

तदधः प्रतिकाकल्या निषादं विलिखेत्सुधीः ।
यथास्वरं वामपार्श्वे लेखनीयं मनीषिभिः ॥ ४१ ॥

दक्षिणे प्रतिकाकल्या अधस्तात्काकलिर्भवेत् ।
यथास्वरं वामपार्श्वे प्रस्तारो न भवेत्ततः ॥ ४२ ॥

तदधः षट्श्रुतिर्लेख्यो वामतस्तु यथास्वरम् ।
दक्षिणे प्रतिकाकल्या निषादोऽधोऽथ काकलिः ॥ ४३ ॥

यथास्वरं वामपार्श्वे लेखनीयं विचक्षणैः ।
ततः प्रस्तारविरहाद्भेद एव न जायते ।
इत्येवमादिमं चक्रं समग्रं वर्णितं शिवे ॥ ४४ ॥

इत्यादिमं चक्रम् ॥

अथ द्वितीयचक्रलक्षणं प्रस्तारयति—

अथ षट्श्रुतिकाकल्योरप्रस्तारतया तथा ।
वामस्थितं समुच्चार्य पञ्चमं मध्यमं तथा ॥ ४५ ॥

अथोच्यते प्रतीशुद्धगान्धाराधः प्रजायते ।
शुद्धगान्धार इत्येव वामपार्श्वे यथाक्रमम् ॥ ४६ ॥

दक्षिणे प्रतिशुद्धाख्यो धैवतश्च निषादकः ।
तदधः शुद्धनैषादो वामपार्श्वे यथाक्रमम् ।
पूर्ववत्प्रस्तरेच्चक्रं द्वितीयमपि कोविदः ॥ ४७ ॥

इति द्वितीयं चक्रम् ।

अथ तृतीयचक्रलक्षणम्—

अथ षट्श्रुतिकाकल्योरप्रस्तारतया तथा ।
वामस्थितं समुच्चार्य पञ्चमं मध्यमं तथा ॥ ४८ ॥

प्रतिसाधारणमधः शुद्धगान्धारतो विदुः ।
यथास्वरं वामपार्श्वे लेखनीयं विचक्षणैः ॥ ४९ ॥

दक्षिणे प्रतिशुद्धाख्यो धैवतश्च निषादकः ।
तदधः शुद्धनैषादो वामपार्श्वे यथाक्रमम् ।
एवं तृतीयचक्रं च विलिखेद्गीतकोविदः ॥ ५० ॥

इति तृतीयं चक्रम् ।

अथ चतुर्थचक्रलक्षणम्—

प्रतिसाधारणस्याधः साधारणमथो लिखेत् ।
यथास्वरं वामपार्श्वे लेखनीयं विचक्षणैः ॥ ५१ ॥

दक्षिणे प्रतिशुद्धाख्यो धैवतोऽथ निषादकः ।
एवमादि यथापूर्वं प्रस्तारयति बुद्धिमान् ॥ ५२ ॥

इति चतुर्थं चक्रम् ।

अथ पञ्चमचक्रलक्षणम्—

साधारणाख्यगान्धारस्याधः प्रत्यन्तरः स्मृतः ।
वामपार्श्वे लेखनीयं क्रमादेव यथास्वरम् ॥ ५३ ॥

दक्षिणे प्रतिशुद्धाख्यो धैवतोऽथ निषादकः ।
एवं प्रस्तारयेद्विद्वान्गीताचार्यो विचक्षणः ॥ ५४ ॥

इति पञ्चमं चक्रम् ।

अथ षष्ठचक्रलक्षणम्—

प्रत्यन्तराख्यगान्धारादधोऽन्तरमथालिखेत् ।
वामपार्श्वे लेखनीयं क्रमादपि यथास्वरम् ॥ ५५ ॥

दक्षिणे प्रतिशुद्धाख्यो धैवतोऽथ निषादकः ।
इत्येवं षष्ठचक्रं च पूर्ववत्प्रस्तरेत्सुधीः ।
अन्तराह्वयगान्धारात्प्रस्तारो न तु संभवेत् ॥ ५६ ॥

इति षष्ठं चक्रम् ।

वामस्थप्रतिशुद्धाख्यरिषभाज्जायते ह्यधः ।
शुद्धर्षभस्तथा दक्षे प्रतिशुद्धाह्वय त्रिकम् ॥ ५७ ॥

गान्धारो धैवतश्चाथ निषादो लिख्यते क्रमात् ।
एवमादि यथापूर्वं प्रस्तारयति कोविदः ॥ ५८ ॥

अखण्डप्रस्तारलक्षणम्—

षड्जस्वरश्च प्रथमो द्वितीयो रिषभस्तथा ।
गान्धारश्च तृतीयोऽथ चतुर्थो मध्यमस्तथा ॥ ५९ ॥

पञ्चमः पञ्चमश्चैव धैवतः षष्ठ एव च ।
निषादः सप्तमश्चैवेत्येते तु स्वरसंज्ञकाः ॥ ६० ॥

एकः षड्जस्य भेदः स्याद्द्विभेदो रिषभस्तथा ।
गान्धारश्च चतुर्भेदो मध्यमस्त्वष्टभेदकः ॥ ६१ ॥

पञ्चमः षोडशभिदो द्वात्रिंशद्भिच्च धैवतः ।
निषादजनिता भेदाश्चतुःषष्टिमिताः स्मृताः ॥ ६२ ॥

ऐकविध्यं तु षड्जस्य स्पष्टमेव विवेकिनाम् ।
जायते रिषभस्याधः षड्जस्वर इतीरितम् ॥ ६३ ॥

वामपार्श्वे पुनः षड्जः षड्जान्तः पूर्ण एव च ।
रिषभस्येति भेदौ द्वौ जायेते शास्त्रसंमतौ ॥ ६४ ॥

गान्धाराधस्तु लिख्येत रिषभस्वर एव च ।
वामपार्श्वे लेखनीयः षड्जस्वर इतीरितम् ॥ ६५ ॥

रिषभाज्जायते षड्जस्तद्वामे रिषभस्तथा ।
पुनश्च रिषभाज्जातस्तदधः षड्ज एव च ॥ ६६ ॥

वामपार्श्वे पुनः षड्जो दक्षिणे षड्ज एव सः ।
षड्जान्तमित्थं संपूर्णं गान्धारस्य चतुष्टयम् ॥ ६७ ॥

मध्यमे पञ्चमे चैव धैवते च निषादके ।
पूर्वप्रस्तारजात्यानि लिख्यन्ते गीतकोविदैः ॥ ६८ ॥

अङ्कश्रेणिलक्षणम्—

अङ्कश्रेण्यश्च लिख्यन्ते सोपानसममेव च ।
क्रमात्तत्रोपरि च षड्जाद्येकोत्तरवृद्धितः ॥ ६९ ॥
अन्त्योपान्त्यतृतीयं च चतुर्थं पञ्चमं तथा ।
षष्ठं सप्तमभावं चेत्येतान्संख्यायुताँल्लिखेत् ।
निषादान्तं भवेद्भावस्तत्परं नास्ति भावकः ॥ ७० ॥

उद्दिष्टलक्षणम्—

उद्दिष्टभेदात्षड्जस्य संख्या नास्तीति तत्परम् ।
रिषभस्य द्विकं कोष्ठमेककोष्ठं च भुक्तकम् ॥ ७१ ॥

गान्धारस्य त्रयः कोष्ठा एककोष्ठं च भुक्तकम् ।
मध्यमस्य चतुःकोष्ठं तदेकं भुक्तमुच्यते ॥ ७२ ॥

पञ्चमं पञ्चकोष्ठं च तदेकं भुक्तमुच्यते ।
निषादे सप्तकोष्ठं च तदेकं भुक्तमुच्यते ॥ ७३ ॥

एवंप्रकारं कोष्ठानां संख्यामुद्धृत्य लेखयेत् ।
तत्संख्यामेकतः कृत्वा वर्जयेदादिसंख्यया ॥ ७४ ॥

यदीच्छेत्पञ्चमं भेदं द्वात्रिंशद्भेदशालिनः ।
उच्यते तत्प्रकारस्तु द्वात्रिंशतिषु पञ्चकम् ॥ ६५ ॥

हित्वा शेषं गुणित्वाऽथ सप्तविंशतिभेदतः ।
अन्ते कोष्ठे षोडशकमुपान्ते चाष्टकं तथा ॥ ७६ ॥

चतुर्थे च द्वयं चैव पञ्चमे चैकमेव च ।
अन्त्योपान्त्येषु गान्धारं तृतीयं वर्जयेत्ततः ॥ ७७ ॥

चतुर्थे पञ्चमे चैव पुनर्गान्धारमीरितम् ।
एवंप्रकारं सर्वेषु तदन्ते नष्टलक्षणम् ॥ ७८ ॥

खण्डप्रस्तारलक्षणम्—

एकयोगो द्वियोगस्त्रियोगोऽन्यश्चतुरादिकः ।
पञ्चयोगोऽथ षड्योगः सप्तयोग इति क्रमात् ॥ ७९ ॥

आरोहाद्यवरोहान्तः प्रस्तारे खण्ड उच्यते ।
एकयोगः स आरोहावरोहक्रमवर्जितः ॥ ८० ॥

द्वियोगे लिख्यते षड्जः प्रस्तारे रिषभादधः ।
वामे च रिषभः प्रोक्तो द्वौ भेदावत्र कीर्तितौ ॥ ८१ ॥

त्रियोगे रिषभात्षड्ज लेख्यमाहुर्मनीषिणः ।
वामे च रिषभः प्रोक्तो दक्षिणे तु यथोपरि ॥ ७२ ॥

विलिखन्त्यथ गान्धाराद्रिषभस्वरमेव हि ।
वामे गान्धारषड्जौ च गान्धारात्षड्जमेव च ॥ ८३ ॥

वामे लिखन्ति गान्धारं दक्षिणे च यथोपरि ।
रिषभादथ लेख्यः स्यात्षड्जाख्यस्वर एव तु ॥ ८४ ॥

वामपार्श्वे लेखनीयो गान्धारो रिषभस्तथा ।
गान्धाराद्रिषभश्चैव वामे गान्धार एव च ।
दक्षिणे षड्ज इत्येवं भेदाः षट् च प्रकीर्तिताः ॥ ८५॥

चतुर्योगे च षड्जाख्यो रिषभाल्लिख्यते स्वरः ।
वामे च रिषभः प्रोक्तो दक्षिणे तु यथोपरि ॥ ८६ ॥

गान्धाराद्रिषभः प्रोक्तो वामे गान्धारषड्जकौ ।
दक्षिणे मध्यमोऽथ स्याद्गान्धारात्षडज एव च ॥ ८७ ॥

वामे गान्धार इत्युक्तो दक्षिणे तु यथोपरि ।
स्वरः षड्जाभिधानस्तु लिख्यते रिषभादधः ॥ ८८ ॥

वामे गान्धाररिषभौ दक्षिणे तु यथोपरि ।
गान्धाराद्रिषभः प्रोक्तो वामे गान्धार एव च ॥ ८९ ॥

स्वरद्वयं लेखनीयं यथोपरि च दक्षिणे ।
मध्यमादथ गान्धारो वामे मध्यम एव च ॥ ९० ॥

तद्वामे रिषभः षड्जो रिषभात्षड्ज एव च ।
वामपार्श्वे च रिषभो दक्षिणे तु यथोपरि ॥ ९१ ॥

मध्यमाद्रिषभः प्रोक्तो वामे मध्यमषड्जकौ ।
दक्षिणे चैव गान्धारः षड्जः स्यान्मध्यमादधः ॥ ९२ ॥

वामे च मध्यमः प्रोक्तो दक्षिणे तु यथोपरि ।
रिषभात्प्रोच्यते षड्जो वामपार्श्वे च मध्यमः ॥ ९३ ॥

तद्वामे रिषभश्चैव दक्षिणे तु यथोपरि ।
मध्यमाद्रिषभः प्रोक्तो वामपार्श्वे च मध्यमः ॥ ९४ ॥

दक्षिणे षड्जगान्धारौ गान्धाराद्रिषभस्तथा ।
वामे मध्यमगान्धारौ तद्वामे षड्ज एव च ॥ ९५ ॥

गान्धाराल्लिख्यते षड्जो वामे गान्धार एव च ।
मध्यमो रिषभश्चेति दक्षिणे तु यथोपरि ॥ ९६ ॥

गान्धारो मध्यमाधः स्याद्वामे मध्यमषड्जकौ ।
दक्षिणे रिषभः प्रोक्तो मध्यमादथ षड्जकः ॥ ९७ ॥

वामभागे मध्यमः स्याद्दक्षिणे तु यथोपरि ।
गान्धारादथ षड्जः स्याद्वामपार्श्वे च मध्यमः ॥ ९८ ॥

तद्वामपार्श्वे गान्धारो दक्षिणे तु यथोपरि ।
मध्यमादथ गान्धारो वामपार्श्वे तु मध्यमः ॥ ९९ ॥

दक्षिणे षड्जरिषभौ षड्जश्च रिषभादधः ।
वामे मध्यमगान्धारौ तद्वामे रिषभस्तथा ॥ १०० ॥

गान्धाराद्रिषभः प्रोक्तो वामे गान्धार इष्यते ।
दक्षिणे मध्यमः षड्जो यथोपरिविधानतः ॥ १०१ ॥

मध्यमादथ गान्धारस्तद्वामे मध्यमस्तथा ।
तद्वामे रिषभः प्रोक्तो दक्षिणे तु यथोपरि ॥ १०२ ॥

मध्यमाद्रिषभश्चैव वामपार्श्वे तु मध्यमः ।
दक्षिणे लेखनीयौ च यथोपरि तथा स्वरौ ॥ १०३ ॥

गान्धारादथ लेख्यः स्यादधस्तु रिषभस्वरः ।
वामे मध्यमगान्धारौ दक्षिणे तु यथोपरि ॥ १०४ ॥

मध्यमादथ गान्धारो लेख्यो वामे तु मध्यमः ।
दक्षिणे च स्वरौ लेख्यौ यथोपरिविधानतः ।
भेदाः प्रस्तार एवं स्युश्चतुर्विंशतिसंख्यकाः ॥ १०५ ॥

सप्ताद्येकान्तकोष्ठानामधोऽधः सप्त पङ्क्तयः ।
तास्वाद्यायामाद्यकोष्ठे लिखेदेकं परेषु खम् ॥ १०६ ॥

वेद्यभेदस्वरमितान्न्यस्येत्तेष्वेव लोष्टकान् ।
प्राक्पङ्क्त्यन्ताङ्कसंयोगमूर्ध्वाधःस्थितपङ्क्तिषु ॥ १०७ ॥

शून्यादधो लिखेदेकं तं चाधोऽधः स्वकोष्ठकात् ।
कोष्ठसंख्यागुणं न्यस्येत्खण्डमेरुरयं मतः ॥ १०८ ॥

श्रुतिजन्यस्वरलक्षणम्—

तीव्राख्यादिश्रुतिभ्यश्च स्वरास्त्रिंशदिहोदिताः ।
ते च गान्धर्वगानैकयोग्या वेद्यास्त्वया शिवे ॥ १ ॥

नरगाने सलक्ष्याणि लक्षणानि ब्रुवेऽधुना ।
तीव्रादिका याः श्रुतयः क्षोभिण्यन्ताः प्रकीर्तिताः ॥ २ ॥

विहाय मार्जनीं तत्र क्षोभिणीं च श्रुतिं तथा ।
मिलनादेकयैकस्या गृहद्वादशकं भवेत् ॥ ३ ॥

प्रथमा च द्वितीया च मिलिते प्रथमं गृहम् ।
तृतीया च चतुर्थी च द्वितीयं गृहमेव च ।
इत्येवं द्वन्द्वमिलनाद् गृहद्वादशकं विदुः ॥ ४ ॥

परा नाम्नाऽथ पुंनादः श्रुतिः स्त्रीनाद एव च ।
उभयोरपि संयोगात्स्वरो जन्यः स उत्तमः ॥ ५ ॥

तत्तच्छ्रुतिभवं प्राहुः स्वरषोडशकं बुधाः ।
स्वराः सप्त प्रकृतयो विकृता नव कीर्तिताः ॥ ६ ॥

षोडशानां स्वराणां च नामानि शृणु पार्वति ।
सोपाने प्रथमे जातः शुद्धो रिषभ इष्यते ॥ ७ ॥

द्वितीयसोपानगतौ शुद्धगान्धार इत्ययम् ।
चतुःश्रुती रिषभ इत्येतौ द्वौ परिकीर्तितौ ॥ ८ ॥

तृतीयसोपानजातौ षट्श्रुती रिषभस्तथा ।
साधारणश्च गान्धार इति द्वौ कीर्तितावुमे ॥ ९ ॥

गान्धारोऽन्तरसंज्ञस्तु तुर्यं सोपानमास्थितः ।
सोपाने पञ्चमे जातः शुद्धमध्यम इष्यते ॥ १० ॥

षष्ठसोपानजनितः प्रतिमध्यमनामकः ।
सोपानात्सप्तमाज्जातः स्वरः पञ्चमनामभाक ॥ ११ ॥

श्रुतेराधारषड्जस्य पञ्चमः सहकार्ययम् ।
सोपानादष्टमाज्जातः शुद्धो धैवत उच्यते ॥ १२ ॥

सोपाने नवमे जातौ चतुःश्रुतिकधैवतः ।
शुद्धो निषाद इति च द्वौ स्वरौ समुदीरितौ ॥ १३ ॥

सोपानाद्दशमाज्जातौ निषादः कैशिकस्तथा ।
धैवतः षट्श्रुतिश्चेति द्वौ स्वरौ परिकीर्तितौ ॥ १४ ॥

एकादशे तु सोपाने काकलिस्वरसंभवः ।
सोपाने द्वादशे चैव षड्जस्वर उदाहृतः ॥ १५ ॥

तेषां प्रस्तारतो जाता भेदा द्वासप्ततिः क्रमात् ।
ख्यायन्ते मेलकर्तारस्ते द्वासप्ततिसंख्यकाः ॥ १६ ॥

मेलप्रस्तारलक्षणम्—

[1]सप्त स्वराश्च शुद्धाः स्युर्निषादाधस्तु[2] कैशिकी ।
लिख्यन्ते वामपार्श्वे च यथाक्रममथ स्वराः ॥ १ ॥

[3]कैशिकाल्लिख्यतेऽधस्तात्काकलिस्वर एव च ।
वामपार्श्वे च लिख्यन्ते यथाक्रममथ स्वराः ॥ २ ॥

[4]चतुःश्रुतिर्धैवतोऽथ लिख्यते धैवतादधः ।
दक्षिणे कैशिकीं चैव वामपार्श्वे यथाक्रमम् ॥ ३ ॥

[5]लिख्यते कैशिकाधश्च काकलिस्वर एव हि ।
वामपार्श्वे लेखनीया यथाक्रममथ स्वराः ॥ ४ ॥

[6]चतुःश्रुतेर्धैवतात्तु षट्श्रुतिं धैवत लिखेत् ।
दक्षिणे काकलीं चैव वामपार्श्वे यथाक्रमम् ॥ ५ ॥

[7]गान्धाराल्लिख्यतेऽधश्च साधारण इति स्वरः ।
दक्षिणे च क्रमः शुद्धो वामपार्श्वे यथाक्रमम् ॥ ६ ॥

[8]निषादादथ लिख्येत कैशिकस्वर एव च ।
वामपार्श्वे लेखनीयाः स्वराः सर्वे यथोपरि ॥ ७ ॥

[9]कैशिकादथ लिख्येत काकलिस्वर एव च ।
वामपार्श्वे च लिख्यन्ते यथोपरि तथा स्वराः ॥ ८ ॥

[10]धैवतादथ लिख्येत चतुःश्रुतिकधैवतः ।
दक्षिणे कैशिकी चैव वामपार्श्वे यथोपरि ॥ ९ ॥

[11] कैशिकादथ लिख्येत काकलिस्वर एव च ।
वामपार्श्वे लेखनीयाः स्वराः सर्वे यथाक्रमम् ॥ १० ॥

[12]चतुःश्रुतेर्धैवतात्तु षट्श्रुतिं धैवतं लिखेत् ।
दक्षिणे काकलीं चैव वामपार्श्वे यथाक्रमम् ॥ ११ ॥

[13]साधारणाधो लिख्येत गान्धारोऽन्तर एव च ।
दक्षिणे च क्रमाच्छुद्धा वामपार्श्वे यथोपरि ॥ १२ ॥

[14]निषादादथ लिख्येत कैशिकस्वर एव च ।
वामपार्श्वे लेखनीयाः स्वरा अथ यथाक्रमम् ॥ १३ ॥

[15] कैशिकादथ लिख्येत काकलिस्वर एव च ।
वामपार्श्वे तु लेख्याः स्युः स्वरा अथ यथोपरि ॥ १४ ॥

[16]धैवताल्लिख्यते शुद्धाच्छतुःश्रुतिकधैवतः ।
दक्षिणे कैशिकश्चैव वामपार्श्वे यथाक्रमम् ॥ १५ ॥

[17]कैशिकादथ लिख्येत काकलिस्वर एव च ।
वामपार्श्वे तु लिख्यन्ते यथोपरि तथा स्वराः ॥ १६ ॥

[18]चतुःश्रुतेर्धैवतात्तु षट्श्रुतिं धैवतं लिखेत् ।
दक्षिणे काकलीं चैव वामपार्श्वे यथाक्रमम् ॥ १७ ॥

[19]रिषभाल्लिख्यते शुद्धाद्रिषभस्तु चतुःश्रुतिः ।
साधारणो दक्षिणेऽथ स्वराः शुद्धाः प्रकीर्तिताः ॥ १८ ॥

[20]निषादादथ लिख्येत कैशिकस्वर एव च ।
वामपार्श्वे लेखनीयाः स्वरा अथ यथाक्रमम् ॥ १९ ॥

[21] कैशिकादथ लिख्येत काकलिस्वर एव च ।
वामपार्श्वे लेखनीया यथाक्रममथ स्वराः ॥ २० ॥

[22] धैवतादथ लिख्येत चतुःश्रुतिकधैवतः ।
दक्षिणे कैशिकश्चैव वामपार्श्वे यथाक्रमम् ॥ २१ ॥

[23] कैशिकादथ लिख्येत काकलिस्वर एव च
वामपार्श्वे लेखनीयाः स्वरा अथ यथाक्रमम् ॥ २२ ॥

[24] चतुःश्रुतिधैवताधः षट्श्रुतिं धैवतं लिखेत् ।
दक्षिणे काकलिं चैव वामपार्श्वे यथाक्रमम् ॥ २३ ॥

[25] साधारणाधो लिख्येत स्वरस्त्वन्तर एव च ।
दक्षिणे च स्वराः शुद्धा वामपार्श्वे यथोपरि ॥ २४ ॥

[26] निषादादथ लिख्येत कैशिकस्वर एव च ।
वामपार्श्वे लेखनीयाः स्वरा अथ यथाक्रमम् ॥ २५ ॥

[27] कैशिकादथ लिख्येत काकलीस्वर एव च ।
वामपार्श्वे लेखनीयाः स्वरा अथ यथाक्रमम् ॥ २६ ॥

[28] धैवतादथ लिख्येत चतुःश्रुतिकधैवतः ।
दक्षिणे कैशिकश्चैव वामपार्श्वे यथाक्रमम् ॥ २७ ॥

[29]कैशिकादथ लिख्येत काकलिस्वर एव च ।
वामपार्श्वे लेखनीयाः स्वरा अथ यथाक्रमम् ॥ २८ ॥

[30]चतुःश्रुतिधैवताधः षट्श्रुतिं धैवत लिखेत् ।
दक्षिणे काकलीं चैव वामपार्श्वे यथाक्रमम् ॥ २९ ॥

[31]चतुःश्रुत्यृषभाधोऽथ षट्श्रुती रिषभः स्मृतः ।
दक्षिणे चान्तरः शुद्धास्तथा वामे यथाक्रमम् ॥ ३० ॥

[32]निषादादथ लिख्येत कैशिकस्वर एव च ।
वामपार्श्वे लेखनीयाः स्वरा अथ यथाक्रमम् ॥ ३१ ॥

[33]कैशिकादथ लिख्येत काकलिस्वर एव च ।
वामपार्श्वे लेखनीयाः स्वरा अथ यथाक्रमम् ॥ ३२ ॥

[34]धैवतादथ लिख्येत चतुःश्रुतिकधैवतः ।
दक्षिणे कैशिकं चैव वामपार्श्वे यथाक्रमम् ॥ ३३ ॥

[35]कशिकादथ लिख्येत काकलिस्वर एव च ।
वामपार्श्वे लेखनीया यथोपरि तथा स्वराः ॥ ३४ ॥

[36]चतुःश्रुतिधैवताधः षट्श्रुतिं धैवतं लिखेत् ।
दक्षिणे काकलीं चैव वामपार्श्वे यथाक्रमम् ॥ ३५ ॥

इमे भेदास्तु षट्त्रिंशच्छुद्धमध्यमसंयुताः ।
एतत्प्रस्तारजातीनां प्रतिमध्यमयोगतः ॥ ३६ ॥

लेखनेऽन्ये च षट्त्रिंशद्भेदा देवि भवन्ति हि ।
आहत्यैते जातिभेदा द्वासप्ततिरुदाहृताः ॥ ३७ ॥

ये तु प्रसिद्धमेलाधिकारिणश्च द्विसप्ततिः ।
तेषां नामानि वक्ष्यन्ते क्रमशो लक्षणानि च ॥ ३८ ॥

अथ शुद्धमध्यममेलकर्तॄणां नामान्युच्यन्ते—

कनकाङ्गी च रत्नाङ्गी गानमूर्तिर्वनस्पतिः ।
नाम्ना मानवती तानरूपी सेनावती तथा ॥ १ ॥

हनुमत्तोडिविख्याता धेनुकेति प्रकीर्तिता ।
नाटकप्रिय इत्युक्तः कोकिलप्रियनामकः ॥ २ ॥

तथा रूपवती चैव गायकप्रियनामकः ।
वकुलाभरणं चैव मायामालवगौलकः ॥ ३ ॥

चक्रवाक इति प्रोक्तः सूर्यकान्त इति स्मृतः ।
हाटकाम्बर्यभिख्या च झङ्कारध्वनिनामकः ॥ ४ ॥

नरभैरविनाम्नी च कीरवाणी ततः परम् ।
खरहरप्रियश्चैव तथा गौरीमनोहरी ॥ ५ ॥

वरुणप्रियनामा च माररञ्जनिका तथा ।
चारुकेशीति विख्याता सरसाङ्गीति कीर्तिता ॥ ६ ॥

हरिकाम्भोजिका धीरशंकराभरणं तथा ।
नागानन्दनिका यागप्रियाऽथो रागवर्धनी ॥ ७ ॥

गाङ्गेयभूषणी नाम्ना वागधीश्वरिनामिका ।
विख्याता शूलिनीनाम्ना चलनाटः प्रकीर्तितः ॥ ८ ॥

अथ प्रतिमध्यममेलकर्तॄणां नामानि—

सालगो नाम विख्यातो जलार्णव इतीरितः ।
ख्याता झालवरालीति नवनीतमिति स्मृतम् ॥ १ ॥

पावनी लोकविख्याता रघुप्रिय इतीरितः ।
गवाम्भोधिरिति ख्यातो भवप्रिय इति श्रुतः ॥ २ ॥

शुभपन्तुवराली च तथा षड्विधमार्गिणी ।
सुवर्णाङ्गीति विख्याता दिव्यमण्यभिधा तथा ॥ ३ ॥

धवलाम्बरिनाम्नी च नामनारायणी ततः ।
कामवर्धन्यभिख्याता रामप्रिय इति स्मृतः ॥ ४ ॥

गमनश्रम इत्युक्तः श्रुता विश्वंभरीति च ।
श्यामलाङ्गीति विख्याता षण्मुखप्रिय एव च ॥ ५ ॥

सिंहेन्द्रमध्यमा चैव हेमवत्यभिधा ततः ।
ख्याता धर्मवतीनाम्ना स्मृता नीतिमतीति च ॥ ६ ॥

कान्तामणिरिति प्रोक्ता रिषभप्रियनामकः ।
लताङ्गीति प्रसिद्धा च वाचस्पतिरितीरितः ॥ ७ ॥

विख्याता मेचकल्याणी ततश्चित्राम्बरी पुनः ।
सुचरित्र इति ख्यातस्तथा ज्योतिःस्वरूपिणी ॥ ८ ॥

धातुवर्धनिविख्याता नासिकाभूषणो तथा ।
ततः कोसल इत्युक्तो रसिकप्रियनामकः ॥ ९ ॥

१. कनकाम्बरीमेललक्षणम्—

शुद्धसप्तस्वरवती पूर्णारोहावरोहिका ।
षड्जग्रहांशकन्यासा मुख्यमेलाधिकारिका ।
वायुबीजाक्षरा सा च कनकाङ्गीति कथ्यते ॥ १ ॥

२. फेनद्युतिमेललक्षणम्—

द्वितीया चैव रत्नाङ्गी कैशिकस्वरसंयुता ।
तथा चेतरशुद्धा स्यात्पूर्णारोहावरोहिका ।
षड्जग्रहांशकन्यासा चाग्निबीजा प्रमोदकृत् ॥ २ ॥

३. [illegible]मेललक्षणम्—

सकाकली गानमूर्तिस्तथा चेतरशुद्धका ।
पूर्णारोहावरोहा च षड्जन्यासांशकग्रहा ।
भूबीजा भाग्यफलदा तथा मेलस्तृतीयकः ॥ ३ ॥

४. भानुमतीमेललक्षणम्—

चतुःश्रुतिधैवतेन कैशिक्या च वनस्पतिः ।
तथैवेतरशुद्धश्च पूर्णारोहावरोहकः ॥ ४ ॥

षड्जग्रहांशकन्यासो जलबीजाक्षरः शुभः ।
तथैव पोषणकरस्तथा मेलश्चतुर्थकः ॥ ५ ॥

५. मनोरञ्जनीमेललक्षणम्—

चतुःश्रुतिधैवतेन काकल्येतरशुद्धका ।
पूर्णारोहावरोहा च षड्जन्यासांशकग्रहा ॥ ६ ॥

आकाशबीजसंयुक्ता शिवदैवा फलप्रदा ।
मानवत्युदिता सद्भिस्तथा मेलश्च पञ्चमः ॥ ७ ॥

६. तनुकीर्त्तिमेललक्षणम्—

षट्श्रुतियुग्धैवतेन काकल्येतरशुद्धकः ।
पूर्णारोहावरोहश्च षड्जन्यासग्रहांशकः ॥ ८ ॥

वायुबीजाक्षरयुतः श्रोत्रमित्रैः स्वरैर्लसन् ।
तानरूपी महारागः षष्ठोऽयमधिकारकः ॥ ९ ॥

७. सेनाग्रणीमेललक्षणम्—

ससाधारणगान्धारोऽन्यशुद्धस्वरान्वितः ।
पूर्णारोहावरोहश्च षड्जन्यासांशकग्रहः ॥ १० ॥

वाय्वग्निबीजयुक्तश्च भीतियुक्तस्वरः शुभः ।
सेनापतिस्तु पुंरागः सप्तमोऽप्यधिकारकः ॥ ११ ॥

८. तोडिमेललक्षणम्—

ससाधारणगान्धारा कैशिकीसमलंकृता ।
तथैवेतरशुद्धा च पूर्णारोहावरोहिका ॥ १२ ॥

षड्जग्रहांशकन्यासा संपद्भूबीजसंयुता ।
हनुमत्तोडिरित्येव चाष्टमोऽप्यधिकारकः ॥ १३ ॥

९. भिन्नषड्जमेललक्षणम्—

ससाधारणगान्धारा काकलीस्वरसंयुता ।
तथा चेतरशुद्धा च पूर्णारोहावरोहिका ॥ १४ ॥

पुष्टिकृज्जलबीजार्णा धेनुका धर्मरूपभृत् ।
नवमो ह्यधिकारोऽयं गीतविद्भिः प्रकीर्त्यते ॥ १५ ॥

१०. नटाभरणमेललक्षणम्—

ससाधारणगान्धारः सचतुःश्रुतिधैवतः ।
सकैशिकनिषादश्चेतरशुद्धस्वरस्तथा ॥ १६ ॥

पूर्णारोहावरोहश्च षड्जन्यासांशकग्रहः ।
वाग्वाकाशाक्षरैड्यश्च शोकभीतिस्वरैर्युतः ।
नाटकप्रियरागोऽयं दशमो ह्यधिकारकः ॥ १७ ॥

११. कोकिलारवमेललक्षणम्—

ससाधारणगान्धारः सचतुःश्रुतिधैवतः ।
सकाकलिनिषादश्चेतरशुद्धस्वरात्मकः ॥ १८ ॥

पूर्णारोहावरोहश्च षड्जन्यासांशकग्रहः ।
भूवायुबीजवर्णश्च शुभकृद्भिः स्वरैर्युतः ।
कोकिलप्रिय इत्येकादशोऽयमधिकारकः ॥ १९ ॥

१२. रौप्यनगमेललक्षणम्—

ससाधारणगान्धारा सषट्श्रुतिकधैवता ।
सकाकलिनिषादा च पूर्णारोहावरोहिका ॥ २० ॥

षड्जग्रहांशकन्यासा चाग्निभूबीजसंयुता ।
संपदानन्दशुभकृत्स्वरयुक्ता विशेषतः ।
रूपावतीति कथिता द्वादशो ह्यधिकारकः ॥ २१ ॥

१३. हेज्जुज्जिमेललक्षणम्—

युक्तोऽन्तरेण गान्धारेणेतरस्वरशुद्धकः ।
पूर्णारोहावरोहश्च षड्जन्यासांशकग्रहः ॥ २२ ॥

वायुभूबीजसंयुक्तः शुभकर्तृस्वरेडितः ।
गायकप्रिय इत्येव ह्यधिकारस्त्रयोदशः ॥ २३ ॥

१४. वसन्तभैरवीमेललक्षणम्—

कैशिक्यन्तरगान्धारसहितेतरशुद्धका ।
पूर्णारोहावरोहा च षड्जन्यासांशकग्रहा ॥ २४ ॥

संजीवनकरी नित्यं जलबीजाक्षरैर्युता ।
वकुलाभरणाख्या चाप्यधिकारश्चतुर्दशः ॥ २५ ॥

१५. मालवगौलमेललक्षणम्—

काकल्यन्तरगान्धारसहितश्चान्यशुद्धकः ।
पूर्णारोहावरोहश्च षड्जन्यासांशकग्रहः ॥ २६ ॥

वाय्वाकाशाक्षरेड्यश्च भीतिस्वरयुतः शुभः ।
अधिकारः पञ्चदशो मायामालवगौलकः ॥ २७ ॥

१६. वेगवाहिनीमेललक्षणम्—

अन्तर्गान्धारसहितश्चतुःश्रुतिकधैवतः ।
सकैशिकनिषादश्चेतरशुद्धस्तथैव च ॥ २८ ॥

पूर्णारोहावरोहश्च षड्जन्यासांशकग्रहः ।
वायुबीजाक्षरवरः शोकस्वरयुतः शुभः ।
चक्रवाक इति ख्यातः षोडशो ह्यधिकारकः ॥ २९ ॥

१७. सुप्रदीपमेललक्षणम्—

अन्तर्गान्धारसहितः सचतुःश्रुतिधैवतः ।
काकलीतरशुद्धश्च पूर्णारोहावरोहकः ॥ ३० ॥

षड्जग्रहन्यासयुतश्चाग्निभूबीजसंगतः ।
सूयकान्तः सप्तदशोऽधिकारः कीर्तितो बुधैः ॥ ३१ ॥

१८. शुद्धमालवीमेललक्षणम्—

अन्तर्गान्धारसहिता सषट्श्रुतिकधैवता ।
सकाकलिनिषादा चेतरशुद्धा तथैव च ॥ ३२ ॥

पूर्णारोहावरोहा च षड्जन्यासांशकग्रहा ।
भूबीजाक्षरसंयुक्ता संपदानन्दकारिणी ।
हाटकाम्बरिकेत्यष्टादशोऽयमधिकारकः ॥ ३३ ॥

१९. झङ्कारभ्रमरीमेललक्षणम्—

ससाधारणगान्धारश्चतुःश्रुत्यृषभान्वितः ।
तथा चेतरशुद्धः संपूर्णारोहावरोहकः ॥ ३४ ॥

षड्जग्रहांशकन्यासो जलाकाशाक्षरैर्युतः ।
संजीवनकरो नित्यं झङ्कारध्वनिरीरितः ।
अधिकार इति प्रोक्तो बुधैरेकोनविंशकः ॥ ३५ ॥

२०. भैरवीमेललक्षणम्—

ससाधारणगान्धारा चतुःश्रुत्यृषभान्विता ।
सकैशिकनिषादा चेतरशुद्धात्मिका मता ॥ ३६ ॥

पूर्णारोहावरोहा च षड्जन्यासांशकग्रहा ।
आकाशबीजसंयुक्ता भैरवस्वरयोगिनी ।
नरभैरविनाम्नीयं विंशोऽयमधिकारकः ॥ ३७ ॥

२१. किरणावलिमेललक्षणम्—

चतुःश्रुत्यृषभोपेता काकलिस्वरसंयुता ।
ससाधारणगान्धारा शुद्धैरन्यैः समन्विता ॥ ३८ ॥

पूर्णारोहावरोहा च षड्जन्यासांशकग्रहा ।
वायुज्वलनबीजीया शोकस्वरसमन्विता ।
कीरवाणीति विख्याता ह्येकविंशोऽधिकारकः ॥ ३९ ॥

२२. श्रीरागमेललक्षणम्—

चतुःश्रुत्यृषभा साधारणगान्धारभूषणा ।
चतुःश्रुतिधैवतयुक्सकैशिकनिषादिनी ॥ ४० ॥

तथैवेतरशुद्धा च पूर्णारोहावरोहिका ।
षड्जन्याससग्रहांशा चाप्यनलस्वरविक्रमा ॥ ४१ ॥

पराक्रमैकफलदः सर्वशत्रुविनाशनः ।
गायकानां प्रियो ह्युक्तो नाम्ना खरहरप्रियः ।
द्वाविंशतितमो मेलः प्रोक्तो गीतिविचक्षणैः ॥ ४२ ॥

२३. वेलावलीमेललक्षणम्—

चतुःश्रुत्यृषभा साधारणगान्धारभूषणा ।
चतुःश्रुतिधैवतयुक्काकलीतरशुद्धभाक् ॥ ४३ ॥

संपूर्णारोहावरोहा षड्जन्यासांशकग्रहा ।
धात्रीजीवनबीजार्णा सुखदाऽऽनन्ददायिनी ।
गौरीमनोहरीत्युक्ता त्रयोविंशोऽधिकारकः ॥ ४४ ॥

२४. वीरवसन्तमेललक्षणम्—

चतुःश्रुत्यृषभः साधारणगान्धारभूषितः ।
षट्श्रुतिधैवतयुतः काकलीतरशुद्धभाक् ॥ ४५ ॥

संपूर्णारोहावरोहः षड्जन्यासग्रहांशकः ।
जलबीजयुतो नित्यं संजीवनकरः शुभः ।
वरुणप्रिय इत्युक्तश्चतुर्विंशोऽधिकारकः ॥ ४६ ॥

२५. शरद्युतीमेललक्षणम्—

चतुःश्रुत्यृषभान्तर्गान्धारेतरविशुद्धिका ।
संपूर्णारोहावरोहा षड्जन्यासग्रहांशका ॥ ४७ ॥

नभोवाय्वक्षरवती शोकस्वरकदम्बयुक् ।
माररञ्जनिका पञ्चविंशोऽयमधिकारकः ॥ ४८ ॥

२६. तरङ्गिणीमेललक्षणम्—

चतुःश्रुत्यृषभान्तर्गान्धारकैशिकराजिता ।
तथा चेतरशुद्धा संपूर्णारोहावरोहिका ॥ ४९ ॥

षड्जन्यासग्रहांशा च वायुबीजाक्षरैर्युता ।
करुणारसशोभाढ्या चारुकेशीति कथ्यते ।
षड्विंशो ह्यधिकारोऽयं गीतशास्त्रज्ञपूजितः ॥ ५० ॥

२७. सुरसेनमेललक्षणम्—

चतुःश्रुत्यृषभान्तर्गान्धारषट्श्रुतिधैवता ।
लसन्तीतरशुद्धा च पूर्णारोहावरोहिका ॥ ५१ ॥

भीतिस्वरकदम्बाढ्या शिखीन्द्रजविभूषिता ।
सरसाङ्गी मनोज्ञेयं सप्तविंशोऽधिकारकः ॥ ५२ ॥

२८. काम्भोजीमेललक्षणम्—

चतुःश्रुत्यृषभान्तर्गान्धारभूषणभूषिता ।
चतुःश्रुतिधैवता च सकैशिकनिषादिका ॥ ५३ ॥

लसन्तीतरशुद्धा च पूर्णारोहावरोहिका ।
षड्जन्यासग्रहांशा च भूमिबीजार्णशोभिता ॥ ५४ ॥

करुणारससंपूर्णा महीसौभाग्यदायिनी ।
हरिकाम्भोजिका ह्यष्टाविंशोऽयमधिकारकः ॥ ५५ ॥

२९. शंकराभरणमेललक्षणम्—

चतुःश्रुत्यृषभान्तर्गान्धारनूपुरसंयुतम् ।
चतुःश्रुतिधैवतकाकलिकाञ्चीविराजितम् ॥ ५६ ॥

शुद्धैरन्यैः स्वरैर्युक्तं पूर्णारोहावरोहकम् ।
षड्जन्यासग्रहांशं च व्योमबीजार्णवन्दितम् ॥ ५७ ॥

रौद्रस्वरयुतं धीरशंकराभरणं शुभम् ।
अधिकारोऽयमेकोनत्रिंश एवमुदीरितः ॥ ५८ ॥

३०. सामन्तमेललक्षणम्—

चतुःश्रुत्यृषभान्तर्गान्धारषट्श्रुतिधैवता ।
सकाकलिनिषादा च पूर्णारोहावरोहिका ॥ ५९ ॥

षड्जग्रहांशकन्यासा व्योमबीजविराजिता ।
भयानकरसैर्युक्ता नागानन्दिनिनामिका ।
अधिकारो महानत्र त्रिंशः संगीतसंमतः ॥ ६० ॥

३१. कलहंसमेललक्षणम्- —

षट्श्रुत्यृषभयुक्ताऽन्तर्गान्धारेतरशुद्धयुक् ।
पूर्णारोहावरोहा च षड्जन्यासग्रहांशका ॥ ६१ ॥

वायुबीजाक्षरवती शान्तस्वरकदम्बिनी ।
यागप्रियेति कथिता ह्यश्वमेधाध्वरेडिता ।
संगीतपण्डितैरेकत्रिंशोऽयमधिकारकः ॥ ६२ ॥

३२. रागचूडामणिमेललक्षणम्—

षट्श्रुत्यृषभयुक्ताऽन्तर्गान्धारा कैशिकीयुता ।
शुभा चेतरशुद्धा संपूर्णारोहावरोहिका ॥ ६३ ॥

षड्जन्यासग्रहांशा च पवनाग्निद्विबीजिनी ।
बीभत्सरससंदोहा रागवर्धनिनामिका ।
संगीतसारवित्पूज्या द्वात्रिंशश्चाधिकारकः ॥ ६४ ॥

३३. गङ्गातरङ्गिणीमेललक्षणम्—

षट्श्रुत्यृषभयुक्तान्तर्गान्धारा काकलीयुता ।
शुभा चेतरशुद्धा संपूर्णारोहावरोहिका ॥ ६५ ॥

षड्जन्यासग्रहांशा च वायुबीजार्णशोभिनी ।
धनैश्वर्यप्रदात्री च कनकान्दोलदायिनी ।
गाङ्गेयभूषणी ह्युक्ता त्रयस्त्रिंशोऽधिकारकः ॥ ६६ ॥

३४. छायानाटमेललक्षणम्—

षट्श्रुत्यृषभयुक्तान्तर्गान्धारमणिभूषणा ।
चतुःश्रुतिधैवतभाक्सकैशिकनिषादिनी ॥ ६७ ॥

शोभिनीतरशुद्धा संपूर्णारोहावरोहिका ।
षड्जन्यासग्रहांशा च वायुवार्बीजमातृका ॥ ६८ ॥

जगन्माता पुटकरी शान्तस्वरकदम्बिनी ।
संगीताख्यसुधासिन्धुवृद्धिकृद् वागधीश्वरी ।
अधिकारश्चतुस्त्रिंशो गीतसारविदीरितः ॥ ६९ ॥

३५. देशाक्षीमेललक्षणम्—

षट्श्रुत्यृषभसान्तर्गान्धारमाल्याधिकारिणी ।
चतुःश्रुतिधैवतेति खड्गखेटकशोभिनी ॥ ७० ॥

सकाकलिनिषादा द्विहंसाम्बुजविलासिनी ।
लसन्तीतरशुद्धा संपूर्णारोहावरोहिका ॥ ७१ ॥

षड्जन्यासग्रहांशादिनाकिनीगणशोभिनी ।
आकाशबीजाट्टहासा रौद्रस्वरकदम्बिनी ॥ ७२ ॥

शूलिनी स्वरशत्रुघ्नी नाम्ना सौभाग्यदायिनी ।
संगीतकोविदैरीड्या पञ्चत्रिंशोऽधिकारकः ॥ ७३ ॥

३६. नाटमेललक्षणम्—

षट्श्रुत्यृषभगान्धारः सषट्श्रुतिकधैवतः ।
सकाकलिनिषादश्चेतरशुद्धस्तथैव च ॥ ७४ ॥

संपूर्णारोहावरोहः षड्जन्यासग्रहांशकः ।
वायुबीजाक्षरयुतः करुणारसशोभितः ।
चलनाट इति प्रोक्तः षट्त्रिंशो ह्यधिकारकः ॥ ७५ ॥

३७. सालवरागमेललक्षणम्—

प्रतिमध्यमसंयुक्तश्चान्यशुद्धात्मकस्तथा ।
संपूर्णारोहावरोहः षड्जन्यासांशकग्रहः ॥ ७६ ॥

वाय्वग्निबीजसंयुक्तः शुभस्वरकदम्बकः ।
नाम्ना सालगरागोऽयं सप्तत्रिंशः प्रकीर्तितः ॥ ७७ ॥

३८. जगन्मोहनमेललक्षणम्—

प्रतिमध्यमकैशिक्यसंयुक्तश्चान्यशुद्धकः ।
संपूर्णारोहावरोहः षड्जन्यासांशकग्रहः ॥ ७८ ॥

भूमिबीजाम्बराढ्यः श्रीसंपद्रत्नाकराह्वयः ।
जलार्णव इति प्रोक्तश्चाष्टत्रिंशोऽधिकारकः ॥ ७९ ॥

३९. वरालिमेललक्षणम्—

प्रतिमध्यमसंयुक्ता काकलीतरशुद्धका ।
संपूर्णारोहावरोहा षड्जन्यासांशकग्रहा ॥ ८० ॥

वायुबीजाक्षरवती जनजीवनकारिणी ।
नाम्ना झालवराल्यूनचत्वारिंशोऽधिकारकः ॥ ८१ ॥

४०. नभोमणिमेललक्षणम्—

प्रतिमध्यमसंयुक्तं सचतुःश्रुतिधैवतम् ।
कैशिकीतरशुद्धं संपूर्णारोहावरोहकम् ॥ ८२ ॥

षड्जन्यासांशकग्रहं व्योमबीजाख्यशिष्यगम् ।
गोपालप्रियमत्यन्तं मृदुस्वरकदम्बकम् ।
नवनीतमिति प्रोक्तं चत्वारिंशोऽधिकारकः ॥ ८३ ॥

४१. प्रभावतीमेललक्षणम्—

प्रतिमध्यमयुक्ता च सचतुःश्रुतिधैवता ।
काकलीतरशुद्धा संपूर्णारोहावरोहिका ॥ ८४ ॥

षड्जग्रहांशकन्यासगङ्गाजलविराजिता ।
वायुबीजाक्षरवती भीतिस्वरकदम्बिनी ।
पावनोनामिका चैकचत्वारिंशोऽधिकारकः ॥ ८५ ॥

४२. रघुलीलमेललक्षणम्—

प्रतिमध्यमयुक्ता च सषट्श्रुतिकधैवता ।
काकलीतरशुद्धा संपूर्णारोहावरोहिका ॥ ८६ ॥

अग्निबीजयुता साध्वी सर्वाभीष्टप्रदायिनी ।
रघुप्रियेति ख्याता द्विचत्वारिंशोऽधिकारकः ॥ ८७ ॥

४३. गीर्वाणमेललक्षणम्—

ससाधारणगान्धारः प्रतिमध्यमशोभितः ।
तथा चेतरशुद्धः संपूर्णारोहावरोहकः ॥ ८८ ॥

षड्जन्यासग्रहांशाख्यत्रिकालक्षीरदायकः ।
भूमिबीजयुतः संपत्सौभाग्यफलपोषकः ।
नाम्ना गवाम्भोधिरिति त्रिचत्वारिंश ईरितः ॥ ८९ ॥

४४. भवानीमेललक्षणम्—

ससाधारणगान्धारप्रतिमध्यमभूषणा ।
कैशिकीतरशुद्धा संपूर्णारोहावरोहिणी ॥ ९० ॥

षड्जग्रहांशकन्यासा शंकरार्धशरीरिणी ।
जलबीजार्णसंयुक्ता जगज्जीवनकारिणी ।
भवप्रियेति च चतुश्चत्वारिंशोऽधिकारकः ॥ ९१ ॥

४५. पन्तुवरालीमेललक्षणम्—

ससाधारणगान्धारप्रतिमध्यमशोभिता ।
काकलीतरशुद्धा संपूर्णारोहावरोहिका ॥ ९२ ॥

षड्जग्रहांशकन्यासा भूम्याकाशाक्षरैर्युता ।
शुभा पन्तुवराली पञ्चचत्वारिंश ईरितः ॥ ९३ ॥

४६. तीव्रवाहिनीमेललक्षणम्—

ससाधारणगान्धारा प्रतिमध्यमसंयुता ।
चतुःश्रुतिधैवतिका कैशिकीतरशुद्धका ॥ ९४ ॥

संपूर्णारोहावरोहा षड्जन्यासग्रहांशका ।
वायुबीजाक्षरवती तपःसिद्धिफलप्रदा ।
षड्विधमार्गिणीनाम्ना षट्चत्वारिंश ईरितः ॥ ९५ ॥

४७. सौवीरमेललक्षणम्—

ससाधारणगान्धारप्रतिमध्यमसंयुता ।
चतुःश्रुतिधैवतेड्या काकलीतरशुद्धका ॥ ९६ ॥

संपूर्णारोहावरोहा षड्जन्यासांशकग्रहा ।
भूम्यग्निबीजसंयुक्ता संपद्विक्रमकारिणी ।
सुवर्णाङ्गी शुभा सप्तचत्वारिंशोऽधिकारकः ॥ ९७ ॥

४८. जीवन्तिनीमेललक्षणम्—

ससाधारणगान्धारप्रतिमध्यमशोभिनी ।
षट्श्रुतिधैवतवती काकलीतरशुद्धका ॥ ९८ ॥

संपूर्णारोहावरोहा षड्जन्यासांशकग्रहा ।
भूम्यग्निबीजोल्लसिता संपद्विक्रमकारिणी ।
नाम्ना दिव्यमणिस्त्वष्टचत्वारिंशोऽधिकारकः ॥ ९९ ॥

४९. धवलाङ्गीमेललक्षणम्—

एषा चान्तरगान्धारप्रतिमध्यमशोभिनी ।
तथा चेतरशुद्धा संपूर्णारोहावरोहिका ॥ १०० ॥

षड्जग्रहांशकन्यासा जलबीजाक्षराञ्चिता ।
जगत्संजीवनकरी विख्याता धवलाम्बरी ।
गीतविद्भिः श्रुतैकोनपञ्चाशो ह्यधिकारकः ॥ १०१ ॥

५०. नर्मदमेललक्षणम्—

जगत्यन्तरगान्धारप्रतिमध्यमशोभिनी ।
कैशिकीतरशुद्धा संपूर्णारोहावरोहिका ॥ १०२ ॥

षड्जग्रहांशकन्यासा वाय्वाकाशनिरन्तरा ।
धर्मादिमोक्षफलदा नामनारायणी मता ।
संगीतशास्त्रिभिः पञ्चाशत्तमो ह्यधिकारकः ॥ १०३ ॥

५१. रामक्रियमेललक्षणम्—

मनस्यन्तरगान्धारप्रतिमध्यमजागरा ।
काकलीतरशुद्धा संपूर्णारोहावरोहिका ॥ १०४ ॥

षड्जग्रहांशकन्यासा वायुबीजयुता शुभा ।
कामवर्धनिनाम्ना ह्येकपञ्चाशोऽधिकारकः ॥ १०५ ॥

५२. रमामनोहरीमेललक्षणम्—

उरस्यन्तरगान्धारप्रतिमध्यमभूषणा ।
चतुःश्रुतिधैवताढ्या कैशिकीतरशुद्धका ॥ १०६ ॥

संपूर्णारोहावरोहा षड्जन्यासांशकग्रहा ।
वाय्वग्निबीजताटङ्कशोभिनी भाग्यदायिनी ।
रामप्रियेति कथिता द्विपञ्चाशोऽधिकारकः ॥ १०७ ॥

५३. गमकक्रियमेललक्षणम्—

वक्षस्यन्तरगान्धारप्रतिमध्यमधूर्वहा ।
चतुःश्रुतिधैवतयुक्काकलीतरशुद्धका ॥ १०८ ॥

संपूर्णारोहावरोहा षड्जन्यासांशकग्रहा ।
भूमिबीजाक्षरवती सदा संपत्करी शुभा ॥ १०९ ॥

लोकानन्दकरी मन्दगामिनी गमनश्रमा ।
कथिता विबुधैरेवं त्रिपञ्चाशोऽधिकारकः ॥ ११० ॥

५४. वैशाखमेललक्षणम्—

जगत्यन्तरगान्धारप्रतिमध्यमसंयुता ।
षट्श्रुतिधैवताढ्या च काकलीतरशुद्धका ॥ १११ ॥

संपूर्णारोहावरोहा षड्जन्यासग्रहांशका ।
जलाग्निबीजसुव्याप्ता सृष्टिस्थितिकरी शुभा ।
विश्वंभरी तु कथिता चतुःपञ्चाश ईरितः ॥ ११२ ॥

५५. शामलमेललक्षणम्—

चतुःश्रुत्यृषभसाधारणगान्धारशोभिनी ।
प्रतिमध्यमसंयुक्तेतरशुद्धात्मिका तथा ॥ ११३ ॥

संपूर्णारोहावरोहा षड्जन्यासांशकग्रहा ।
आकाशवायुबीजोत्था घनस्वरकदम्बिनी ।
शामलाङ्गीति कथिता पञ्चपञ्चाश ईरितः ॥ ११४ ॥

५६. त्रिमूर्तिमेललक्षणम्—

चतुःश्रुत्यृषभसाधारणगान्धारभूषणा ।
प्रतिमध्यमसंनद्धा कैशिकीबर्हिवाहिनी ॥ ११५ ॥

तथा चेतरशुद्धा संपूर्णारोहावरोहिणी ।
षड्जग्रहांशकन्यासा वायुबीजाक्षरा शुभा ॥ ११६ ॥

शृङ्गारस्वरसंयुक्ता देवसेनाफलप्रदा ।
षट्पञ्चाशोऽधिकारश्च नाम्ना स्यात्षण्मुखप्रिया ॥ ११७ ॥

५७. सीमन्तिनीमेललक्षणम्—

चतुःश्रुत्यृषभसाधारणगान्धारविक्रमा ।
प्रतिमध्यमयुक्ता काकलीकरिविहारिणी ॥ ११८ ॥

तथा चेतरशुद्धा संपूर्णारोहावरोहिणी ।
षड्जग्रहांशकन्यासवह्निबीजादिराजिता ॥ ११९ ॥

पराक्रमैकफलदा ह्युक्ता सिंहेन्द्रमध्यमा ।
संगीतविबुधैः सप्तपञ्चाशो ह्यधिकारकः ॥ १२० ॥

५८. सिंहरवमेललक्षणम्—

चतुःश्रुत्यृषभसाधारणगान्धारवर्णिनी ।
प्रतिमध्यमभूषाढ्या चतुःश्रुतिकधैवता ॥ १२१ ॥

कैशिकीतरशुद्धा संपूर्णारोहावरोहिणी ।
षड्जन्यासग्रहांशा च भूबीजसहिता शुभा ॥ १२२ ॥

संपत्पुष्टिकरी हेमवतिनी विबुधेडिता ।
कथिता गीतगैरष्टपञ्चाशो ह्यधिकारकः ॥ १२३ ॥

५९. धौम्यरागमेललक्षणम्—

चतुःश्रुत्यृषभसाधारणगान्धारभूषिता ।
प्रतिमध्यमसंयुक्ता चतुःश्रुतिकधैवता ॥ १२४ ॥

काकलीतरशुद्धा संपूर्णारोहावरोहिणी ।
षड्जग्रहांशकन्यासा जलबीजाक्षरास्पदा ॥ १२५ ॥

षड्जन्मानन्दनकरी धर्मविद्रतये स्थिता ।
अर्थकामादिफलदा नाम्ना धर्मवती शुभा ।
संगीतविद्भिरेकोनषष्टिसंख्योऽधिकारकः ॥ १२६ ॥

६०. निषादरागमेललक्षणम्—

चतुःश्रुत्यृषभसाधारणगान्धारसत्पथा ।
प्रतिमध्यमसंयुक्ता सषट्श्रुतिकधैवता ॥ १२७ ॥

काकलीतरशुद्धा संपूर्णारोहावरोहिका ।
षड्जग्रहांशकन्यासा चाकाशानलसंयुता ॥ १२८ ॥

न्यायवादिभिरत्यन्तपूजिता धर्मवर्तिनी ।
नाम्ना नीतिमती ख्याता सोऽयं षष्टितमो मतः ॥ १२९ ॥

६१. कुन्तलमेललक्षणम्—

चतुःश्रुत्यृषभान्तर्गान्धारकप्रतिमध्यमा ।
तथा चेतरशुद्धा संपूर्णारोहावरोहिणी ॥ १३० ॥

षड्जग्रहांशकन्यासप्रभुभावविवक्षिणी ।
वायुबीजाक्षरवती घनस्वरकदम्बिनी ।
नाम्ना कान्तामणिः ख्याता ह्येकषष्टितमो मतः ॥ १३१ ॥

६२. रत्नभानुमेललक्षणम्—

चतुःश्रुत्यृषभान्तर्गान्धारकप्रतिमध्यमा ।
कैशिकीतरशुद्धा संपूर्णारोहावरोहिणी ॥ १३२ ॥

षड्जग्रहांशकन्यासा व्योमबीजविराजिता ।
घनस्वरकदम्बाढ्या कथिता रिषभप्रिया ।
धर्मस्वरूपिणी ह्येषा द्विषष्टितम इष्यते ॥ १३३ ॥

६३. गोत्रारिमेललक्षणम्—

चतुःश्रुत्यृषभान्तर्गान्धारकप्रतिमध्यमा ।
काकलीतरशुद्धा संपूर्णारोहावरोहिका ॥ १३४ ॥

षड्जग्रहांशकन्यासा भूबीजमृदुला शुभा ।
संपत्करी सेवकानां लताङ्गी बुधसंमता ।
गानविद्भिरिति प्रोक्ता स त्रिषष्टितमो मतः ॥ १३५ ॥

६४. भूषावलीमेललक्षणम्—

चतुःश्रुत्यृषभान्तर्गान्धारकप्रतिमध्यमः ।
चतुःश्रुतिधैवताढ्यः कैशिकीतरशुद्धकः ॥ १३६ ॥

संपूर्णारोहावरोहः षड्जन्यासांशकग्रहः ।
धरणीबीजसंयुक्तो लोकवन्द्यः सुरोत्तमः ॥ १३७ ॥

धनधान्यसुवस्तूनां लाभकृत्स्वेष्टपुष्टिकृत् ।
रागनायक इत्येव वाचस्पतिरुदाहृतः ।
गानविद्याविदां श्रेष्ठैश्चतुःषष्टितमो मतः ॥ १३८ ॥

६५. कल्याणीमेललक्षणम्—

चतुःश्रुत्यृषभान्तर्गान्धारकप्रतिमध्यमा ।
चतुःश्रुतिधैवतयुक्ताकलीतरशुद्धका ॥ १३९ ॥

संपूर्णारोहावरोहा षड्जन्यासांशकग्रहा ।
व्योमबीजयुतोत्साहवर्धनी बुधसंमता ।
नाम्ना च मेचकल्याणी पञ्चषष्टितमो मतः ॥ १४० ॥

६६. चतुरङ्गिणीमेललक्षणम्—

चतुःश्रुत्यृषभान्तर्गान्धारकप्रतिमध्यमा ।
षट्श्रुतिधैवतवती काकलीतरशुद्धिका ॥ १४१ ॥

संपूर्णारोहावरोहा षड्जन्यासांशकग्रहा ।
वायुबीजयुता चित्रचेलालंकारभूषणा ॥ १४२ ॥

विचित्ररागसहिता नाम्ना चित्राम्बरी शुभा ।
षट्षष्टितममाहुर्वा अधिकारं तु तद्विदः ॥ १४३ ॥

६७. सत्यवतीमेललक्षणम्—

षट्श्रुतिरिषभान्तर्गान्धारकप्रतिमध्यमा ।
तथा चेतरशुद्धा संपूर्णारोहावरोहिका ॥ १४४ ॥

षड्जग्रहांशकन्यासा प्रौढनायकसंमता ।
अग्निबीजयुता साध्वी स्वकीयनायकोत्सुका ॥ १४५ ॥

सुचरित्रेति कथिता चारित्रशुभभूषणा ।
सप्तषष्टितमः सोऽयमधिकारः प्रकीर्तितः ॥ १४६ ॥

६८. जोतिष्मतीमेललक्षणम्—

षट्श्रुतिरिषभान्तर्गान्धारकप्रतिमध्यमा ।
कैशिकीतरशुद्धा संपूर्णारोहावरोहिका ॥ १४७ ॥

षड्जग्रहांशकन्यासा भूजलानिलवर्तिनो ।
सृष्टिस्थितिकरी सर्वजीवान्तर्यामिनी मता ।
जोतिःस्वरूपिणी ह्येनमष्टषष्टितमं विदुः ॥ १४८ ॥

६९. धौतपञ्चममेललक्षणम्—

षट्श्रुत्यृषभसान्तर्गान्धारकप्रतिमध्यमा ।
काकलीतरशुद्धा संपूर्णारोहावरोहिका ॥ १४९ ॥

षड्जग्रहांशकन्यासा पयोवायुसुसंयुता ।
कामसंवर्धनी नृणां धातुवर्धनिनामिका ।
एकोनसप्ततितमः ख्यातोऽयमधिकारकः ॥ १५० ॥

७०. नासामणिमेललक्षणम्—

षट्श्रुत्यृषभसान्तर्गान्धारकप्रतिमध्यमा ।
चतुःश्रुतिधैवतका कैशिकीतरशुद्धका ॥ १५१ ॥

संपूर्णारोहावरोहा षड्जन्यासांशकग्रहा ।
वाय्वाकाशमहोल्लासविकासिच्छविसंयुता ॥ १५२ ॥

सुगन्धसारविन्नाम्ना नासिकाभूषणी शुभा ।
एषोऽधिकारः सप्ततितमो विद्भिरुदीरितः ॥ १५३ ॥

७१. कुसुमावलिमेललक्षणम्—

षट्श्रुत्यृषभसान्तर्गान्धारकप्रतिमध्यमः ।
चतुःश्रुतिधैवताढ्यः काकलीतरशुद्धकः ॥ १५४ ॥

संपूर्णारोहावरोहः षड्जन्यासांशकग्रहः ।
जलानिलयुतः श्रीमत्स्वराख्यसरयूर्जितः ॥ १५५ ॥

जगज्जीवनरक्षार्थमुद्यद्रामास्पदप्रियः ।
रक्षःशत्रुक्षयकरो रागोऽयं कोसलाभिधः ।
इममेकसप्ततितमाधिकारं प्रचक्षते ॥ १५६ ॥

७२. रसमञ्जरीमेललक्षणम्—

षट्श्रुत्यृषभसान्तर्गान्धारकप्रतिमध्यमः ।
षट्श्रुतिधैवतयुतः काकलीतरशुद्धकः ॥ १५७ ॥

संपूर्णारोहावरोहः षड्जन्यासांशकग्रहः ।
अग्निबीजयुतः सोऽयं रसिकप्रियनामकः ।
द्विसप्ततितमः सद्भिरधिकारः प्रकीर्तितः ॥ १५८ ॥

अथ मेलोत्पन्नरागनामान्युच्यन्ते—

१. प्रथमात्कनकाङ्ग्याख्यान्मेलाद्धि कनकाम्बरी ।
तथा शुद्धमुखारीति रागौ द्वौ जनितौ क्रमात् ॥ १ ॥

२. द्वैतीयीकात्तु रत्नाङ्गीमेलात्फेनद्युतिस्तथा ।
श्रीमणिर्घण्टारवश्च त्रय एते तु जज्ञिरे ॥ २ ॥

३. गानमूर्तिरिति ख्यातात्तृतीयान्मेलतः क्रमात् ।
रागौ द्वौ जनितौ सामवरालीभिन्नपञ्चमौ ॥ ३ ॥

४. वनस्पत्याह्वयान्मेलाच्चतुर्थादथ रागकौ ।
एको भानुमतीसंज्ञो रसालिर्नामतः परः ॥ ४ ॥

५. मानवत्याह्वयान्मेलात्पञ्चमाज्जनितावुभौ ।
रागौ मनोरञ्जनिकाघनश्यामलनामकौ ॥ ५ ॥

६. तानरूप्याह्वयान्मेलात्षष्ठाज्जनिकृतावुभौ ।
तनुकीर्त्त्यभिधो नाम्ना रागः शृङ्गारिणीति च ॥ ६ ॥

७. सेनापत्यभिधान्मेलात्सप्तमाज्जज्ञिरे त्रयः ।
रागाः सेनाग्रणीभोगिचिन्तामणिसमाह्वयाः ॥ ७ ॥

८. अष्टमाद्धनुमत्तोडीमेलाद्रागा नव क्रमात् ।
शुद्धतोडी च भूपालस्तथा नागवरालिका ॥ ८ ॥

शुद्धसामन्ताभिधानस्ततोऽसावेर्युपाह्वयः ।
सपुंनागवराल्याख्यः शुद्धसीमन्तिनामकः ।
राग आहिरिसंज्ञश्च तथा धन्यासिसंज्ञकः ॥ ९ ॥

९. नवमाद्धेनुकामेलात्त्रयो रागास्तु जज्ञिरे ।
भिन्नषड्जस्तथा शोकवराली टक्क इत्यपि ॥ १० ॥

१०. नाटकप्रियमेलात्तु दशमाज्जनितौ क्रमात् ।
रागौ च दीपरनटाभरणाख्याविमावुभौ ॥ ११ ॥

११. कोकिलप्रियमेलादेकादशाज्जनितावुभौ ।
कोकिलारववर्धन्यौ नाम रागौ प्रकीर्तितौ ॥ १२ ॥

१२. द्वादशाद्रूपवत्याख्यान्मेलाद्दीप्यनगोऽजनि ॥ १३ ॥

१३. गायकप्रियमेलात्तु रागाः पञ्च त्रयोदशात् ।
हेज्जिज्जिर्मेघरागश्च जुजावलिरतः परम् ।
कलकण्ठी कलगड इत्येते हि जनिताः क्रमात् ॥ १४ ॥

१४. वकुलाभरणान्मेलाच्चत्वारो रागकाः स्मृताः ।
यथा रागवसन्तश्च वसन्तभैरवी तथा ।
सोमरागोऽथ वसन्तमुखारीति च कीर्तिताः ॥ १५ ॥

१५. मायामालवगौलाख्यमेलात्पञ्चदशात्स्मृताः ।
एकत्रिंशन्मिता रागा यथा सावेरिका ततः ॥ १६ ॥

जगन्मोहिनिरागश्च गौलो बौलिस्तथैव च ।
सारङ्गनाटसंज्ञश्च नाथनामक्रियस्तथा ॥ १७ ॥

मेचबौलिर्गुम्मकाम्भोजी रेगुप्तिसमाह्वयः ।
मलहरिश्च सालङ्गनाटमङ्गलकैशिकौ ॥ १८ ॥

ललिताद्यः पञ्चमो मारुवः शुद्धक्रियस्तथा ।
